१ पारे मध्ये षष्ठ्या वावचनम् ।

२ अवचने हि षष्ठीसमासाभावो यथैकदेशिप्रधाने ।

३ एकारान्तनिपातनं च ।

संख्या वंश्येन ॥ १९ ॥

नदीभिश्च ॥ २० ॥

१ नदीभिः संख्यासमासेऽन्यपदार्थे प्रतिषेधः[3] ।

अन्यपदार्थे च संज्ञायाम् ॥ २१ ॥

तत्पुरुषः ॥ २२ ॥

द्विगुश्च ॥ २३ ॥

द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ॥ २४ ॥

---

१ प. पुस्तके इतः परमधिकम् । पूर्वस्याङ्गवद्भवतीति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । अक्षादयस्तृतीयान्ता पूर्वोक्तस्य यथा न तद् । एकत्वेऽक्षशलाकयोः । कितवव्यवहारे च । ३ प. पुस्तके इतः परमधिकम् । नदीभिः संख्यायाः समाहारेऽव्ययीभावो वक्तव्यः ।

१ श्रितादिषु गमिगाम्यादीनामुपसंख्यानम् ।

२ श्रितादिभिरहीने द्वितीयासमासवचनानर्थक्यं बहुव्रीहिकृतत्वात् ।

३ अहीने द्वितीयास्वरवचनानर्थक्यं च ।

४ जातिस्वरप्रसङ्गस्तु ।

५ तत्र जातादिषु वावचनात्सिद्धम् ।

स्वयं क्तेन ॥ २५ ॥

खट्वा क्षेपे ॥ २६ ॥

सामि ॥ २७ ॥

कालाः ॥ २८ ॥

अत्यन्तसंयोगे च ॥ २९ ॥

१ अत्यन्तसंयोगे समासस्याविशेषवचनात् क्तेन समासवचनानर्थक्यम् ।

२ अनत्यन्तसंयोगार्थं तु ।

तृतीया तत्कृतार्थेन गुणवचनेन ॥ ३० ॥

१ तृतीयासमासेऽर्थग्रहणमनर्थकमर्थगतिर्ह्यवचनात् ।

२ निर्देश्यमिति चेत्तृतीयार्थनिर्देशोऽपि ।

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ॥ ३१ ॥

१ पूर्वादिष्ववरस्योपसंख्यानम् ।

२ सदृशग्रहण उक्तम् ।

कर्तृकरणे कृता बहुलम् ॥ ३२ ॥

१ कर्तृकरणे कृता क्तेन ।

कृत्यैरधिकार्थवचने ॥ ३३ ॥

१ कृत्यैरधिकार्थवचनेऽन्यत्रापि दृश्यते[1] ।

२ साधनं कृतेति वा पादहारकाद्यर्थम्[2] ।

अन्नेन व्यञ्जनम् ॥ ३४ ॥

भक्ष्येण मिश्रीकरणम् ॥ ३५ ॥

१ अन्नेन व्यञ्जनं भक्ष्येण मिश्रीकरणमित्यसमर्थसमासः ।

२ कारकाणां क्रियया सामर्थ्यात् ।

३ वचनप्रामाण्यादिति चेन्नानाकारकाणां प्रतिषेधः ।

४ सिद्धं तु समानाधिकरणाधिकारे क्तस्तृतीयापूर्वपद उत्तरपदलोपश्च ।

५ षष्ठीसमासश्च युक्तपूर्णान्तः ।

६ न वासमासेऽदर्शनात् ।

७ युक्तार्थसंप्रत्ययाच्च सामर्थ्यम् ।

८ संप्रत्ययाच्च तदर्थाध्यवसानम् ।

९ संप्रतीयमानार्थलोपे ह्यनवस्था ।

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ३६

१ चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसङ्गोऽविशेषात् ।

२ बलिरक्षिताभ्यां चानर्थकं वचनम् ।

३ विकृतिः प्रकृत्येति चेदश्वघासादीनामुपसंख्यानम् ।

४ अर्थेन नित्यसमासवचनम् ।

५ सर्वलिङ्गता च ।

पञ्चमी भयेन ॥ ३७ ॥[3]

अपेतापोढमुक्तपतितापत्रस्तैरल्पशः ।३८।

---

१ प. पुस्तके नास्ति । २ कृत्यग्रहणे यण्ण्यतोर्ग्रहणमिति प. पुस्तके काशिकास्थ पाठः । ३ प. पुस्तके इतः परमधिकम् । भयभीतभीतिभीभिरिति वक्तव्यम् । भयनिर्गतजुगुप्सुभिरिति वक्तव्यम् ।

स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ॥३९॥

सप्तमी शौण्डैः ॥ ४० ॥

सिद्धशुष्कपक्वबन्धैश्च ॥ ४१ ॥

ध्वाङ्क्षेण क्षेपे ॥ ४२ ॥

१ ध्वाङ्क्षेणेत्यर्थग्रहणम् ।

कृत्यैर्ऋणे ॥ ४३ ॥

१ कृत्यैर्नियोगे यद्ग्रहणम् ।

संज्ञायाम् ॥ ४४ ॥

क्तेनाहोरात्रावयवाः ॥ ४५ ॥

तत्र ॥ ४६ ॥

क्षेपे ॥ ४७ ॥

१ [1]क्षेपे गतिकारकपूर्व उक्तम् ।

पात्रेसमितादयश्च[3] ॥ ४८ ॥

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ॥ ४९ ॥

दिक्संख्ये संज्ञायाम् ॥ ५० ॥

तद्धितार्थोत्तरपदसमाहारे च ॥ ५१ ॥

१ द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिः ।

२ अर्थे चेत्तद्धितानुत्पत्तिर्बहुव्रीहिवत् ।

३ समासतद्धितविधाविति चेदन्यत्र समाससंज्ञाभावः ।

४ सिद्धं तु प्रत्ययोत्तरपदयोश्चेति वचनात् ।

५ द्विगोर्वा लुग्वचनं ज्ञापकं तद्धितोत्पत्तेः ।

६ समाहारसमूहयोरविशेषात्समाहारग्रहणानर्थक्यं तद्धितार्थेन कृतत्वात् ।

७ अभिधानार्थं तु ।

८ द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम् ।

९ उत्तरपदेन परिमाणिना द्विगोः समासवचनम् ।

१० अन्यत्र समुदायबहुव्रीहित्वादुत्तरपदप्रसिद्धिः ।

११ सर्वत्र मत्वर्थे प्रतिषेधः ।

संख्यापूर्वो द्विगुः ॥ ५२ ॥

कुत्सितानि कुत्सनैः ॥ ५३ ॥

पापाणके कुत्सितैः ॥ ५४ ॥

उपमानानि सामान्यवचनैः ॥ ५५ ॥

१ उपमानसमासे गुणवचनस्य विशेषभाक्त्वात्सामान्यवचनाप्रसिद्धिः ।

२ न वा श्यामत्वस्योभयत्र भावात्तद्वाचकत्वाच्च शब्दस्य सामान्यवचनप्रसिद्धिः ।

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥

विशेषणं विशेष्येण बहुलम् ॥ ५७ ॥

१ विशेषणविशेष्ययोरुभयविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनाप्रसिद्धिः ।

२ न वान्यतरस्य प्रधानभावात्तद्विशेषकत्वाच्चापरस्योपसर्जनप्रसिद्धिः ।

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ॥ ५८ ॥

१ बहुलवचनस्याकृत्स्नत्वादुत्तरत्रानुक्रमणसामर्थ्यम् ।

श्रेण्यादयः कृतादिभिः ॥ ५९ ॥

१ श्रेण्यादिषु च्व्यर्थवचनम् ।

---

१ प पुस्तके इतः परमधिकम् । शौण्डादिभिरिति वक्तव्यम् । २ प. पुस्तके नास्ति । ३ का. °संमिता° ।

क्तेन नञ्विशिष्टेनानञ् ॥ ६०॥

१ नञ्विशिष्टे समानप्रकृतिवचनम् ।

२ नुडिडधिकेन च ।

३ कृतापकृतादीनां चोपसंख्यानम् ।

४ सिद्धं तु क्तेन विसमासावनञ् ।

५ गतप्रत्यागतादीनां चोपसंख्यानम् ।

सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ६१

वृन्दारकनागकुञ्जरैः पूज्यमानम् ॥६२॥

कतरकतमौ जातिपरिप्रश्ने ॥ ६३ ॥

किं क्षेपे ॥ ६४ ॥

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ॥ ६५ ॥

प्रशंसावचनैश्च ॥ ६६ ॥

युवा खलतिपलितवलिनजरतीभिः ।६७।

कृत्यतुल्याख्या अजात्या ॥ ६८ ॥

वर्णो वर्णेन ॥ ६९ ॥

१ वर्णेन तृतीयासमास एतप्रतिषेधे वर्णग्रहणम् ।

२ समानाधिकरणे द्विर्वर्णग्रहणम् ।

३ समानाधिकरणाधिकारे प्रधानोपसर्जनानां परं परं विप्रतिषेधेन ।

४ समानाधिकरणसमासाद्बहुव्रीहिः।

५ कदाचित्कर्मधारयः सर्वधनाद्यर्थः ।

६ पूर्वपदातिशय आतिशायिकाद्बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थः ।

७ उत्तरपदातिशय आतिशयिको बहुव्रीहेर्वेह्वाढ्यतराद्यर्थः ।

८ समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च[1] ।

कुमारः श्रमणादिभिः ॥ ७० ॥

चतुष्पादो गर्भिण्या ॥ ७१ ॥

मयूरव्यंसकादयश्च ॥ ७२ ॥

॥ इति द्वितीयाध्यायस्य प्रथमः पादः ॥

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे॥१

अर्धं नपुंसकम् ॥ २ ॥

द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् ।

१ द्वितीयादीनां विभाषाप्रकरणे विभाषावचनं ज्ञापकमवयवविधाने सामान्यविधानाभावस्य ।

प्राप्तापन्ने च द्वितीयया ॥ ४ ॥

कालाः परिमाणिना ॥ ५ ॥

१ कालस्य येन समासस्तस्यापरिमाणित्वादनिर्देशः

२ सिद्धं तु कालपरिमाणं यस्य स कालस्तेन।

३ एकवचनाद्द्विगोश्चोपसंख्यानम् ।

४ [3]उक्तं वा ।

नञ् ॥ ६ ॥

१ [4]नञ्समासे भाववचन उक्तम् ।

ईषदकृता ॥ ७ ॥

१ ईषद्गुणवचनेन ।

षष्ठी ॥ ८ ॥

१ कृद्योगा च ।

२ तत्स्थैश्च गुणैः ।

३ न तु तद्विशेषणैः ।

१ प. पुस्तके इतः परमधिकम् । अनञिति प्रतिषेधो वक्तव्यः । २ प. पुस्तके इतः परमधिकम् । चतुष्पाज्जातिरिति वक्तव्यम् । ३–४ प. पुस्तके नास्ति ।

याजकादिभिश्च ॥ ९ ॥

न निर्धारणे ॥ १० ॥

१ प्रतिपदविधाना च ।

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन ॥ ११ ॥

क्तेन च पूजायाम् ॥ १२ ॥

अधिकरणवाचिना च ॥ १३ ॥

कर्मणि च ॥ १४ ॥

१ कर्मणीति षष्ठीनिर्देशश्चेदकर्तरि कृता समासवचनम् ।

२ तृजकाभ्यां चानर्थकः प्रतिषेधः ।

३ क्तनिर्देशेऽसमर्थत्वादप्रतिषेधः ।

४ प्रतिषेध्यमिति चेत्कर्तर्यपि प्रतिषेधः ।

५ पूजायां च प्रतिषेधानर्थक्यम् ।

६ तस्मादुभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधः ।

तृजकाभ्यां कर्तरि ॥ १५ ॥

कर्तरि च ॥ १६ ॥

नित्यं क्रीडाजीविकयोः ॥ १७ ॥

कुगतिप्रादयः ॥ १८ ॥

१ प्रादिप्रसङ्गे कर्मप्रवचनीयः प्रतिषेधः ।

२ व्यवेतप्रतिषेधश्च ।

३ सिद्धं तु काङ्स्वतिदुर्गतिवचनात् ।

४ [1]प्रादयः क्ताथ ।

उपपदमतिङ् ॥ १९ ॥

१ उपपदमतिङिति तदर्थप्रतिषेधः ।

२ क्रियाप्रतिषेधो वा ।

३ षष्ठीसमासादुपपदसमासो विप्रतिषेधेन ।

४ न वा षष्ठीसमासस्याभावादुपपदसमासः

अमैवाव्ययेन ॥ २० ॥

तृतीयाप्रभृतीन्यन्यतरस्याम् ॥ २१ ॥

क्त्वा च ॥ २२ ॥

शेषो बहुव्रीहिः ॥ २३ ॥

१ शेषवचनं पदतश्चेन्नाभावात् ।

२ अर्थतश्चेदविशिष्टम् ।

अनेकमन्यपदार्थे ॥ २४ ॥

१ [2]शेषवचन उक्तम् ।

२ अनेकवचनमुपसर्जनार्थम् ।

३ न वैकविभक्तित्वात् ।

४ पदार्थाभिधानेऽनुप्रयोगानुपपत्तिरभिहितत्वात् ।

५ न वानभिहितत्वात् ।

६ सामान्याभिधाने हि विशेषानभिधानम् ।

७ विभक्त्यर्थाभिधानेऽद्रव्यस्य लिङ्गसंख्योपचारानुपपत्तिः ।

८ सिद्धं तु यथा गुणवचनेषु ।

९ [3]उक्तं वा ।

१० बहुव्रीहिः समानाधिकरणानाम् ।

११ अव्ययानां च ।

१२ सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च ।

---

१ प. पुस्तके इतःपरमधिकम् । स्वती पूजायाम् (सौनाग) । दुर्निन्दायाम् (सौनाग) । आङीषदर्थे (सौनाग) । कुः पापार्थे (सौनाग) । प्रादयो गताद्यर्थे प्रथमया । अत्यादयः क्रान्ताद्यर्थे द्वितीयया । अवादयः क्रुष्टाद्यर्थे तृतीयया । पर्यादयो ग्लानाद्यर्थे चतुर्थ्या । निरादयः क्रान्ताद्यर्थे पञ्चम्या । अव्ययं प्रवृद्धादिभिः । इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च । उदात्तवता तिङा गतिमता चाव्ययं समस्यत इति वक्तव्यम् । २-३ प. पुस्तके नास्ति ।

१३ समुदायविकारषष्ठ्याश्च ।

१४ प्रादिभ्यो धातुजस्य वा ।

१५ नञोऽस्त्यर्थानाम् ।

१६ न वानभिधानादसमानाधिकरणेषु संज्ञाभावः ।

१७ अर्थनियमे मत्वर्थग्रहणम् ।

१८ तथा चोत्तरस्य वचनार्थः ।

१९ कर्मवचनेनाप्रथमायाः ।

२० कर्तृवचनेनापि ।

२१ सुबधिकारेऽस्तिक्षीरादिवचनम् ।

२२ न वाव्ययत्वात् ।

संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये ॥ २५॥

१ संख्यासमासे सुजन्तत्वात्संख्याप्रसिद्धिः।

२ न वासुजन्तत्वात् ।

३ सुजभावोऽभिहितार्थत्वात्समासे ।

४ अशिष्यः संख्योत्तरपदः संख्येयवाभिधायित्वात् ।

५ मत्वर्थे वा पूर्वस्य विधानात् ।

६ कबभावार्थं वा ।

दिङ्नामान्यन्तराले ॥ २६ ॥

तत्र तेनेदमिति सरूपे ॥ २७ ॥

१ दिक्समाससहयोगयोश्चान्तरालप्रधानाभिधानात् ।

२ मत्वर्थे वा पूर्वस्य विधानात् ।

३ कबभावार्थं वा ।

तेन सहेति तुल्ययोगे ॥ २८ ॥

१ तृतीयासप्तम्यन्तेषु च क्रियाभिधानात् ।

२ न वैकशेषप्रतिषेधार्थम् ।

३ पूर्वदीर्घार्थं च ।

४ मत्वर्थे वा पूर्वस्य विधानात् ।

५ कबभावार्थं वा ।

चार्थे द्वन्द्वः ॥ २९ ॥

१ चार्थे द्वन्द्ववचनेऽसमासेऽपि चार्थसंप्रत्ययादनिष्टप्रसङ्गः ।

२ सिद्धं तु युगपदधिकरणवचने द्वन्द्ववचनात् ।

३ तत्र पुंवद्भावप्रतिषेधः ।

४ विप्रतिषिद्धेषु चानुपपत्तिः[२] ।

५ शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानमिति चेद्द्विवचनबहुवचनानुपपत्तिः ।

६ विग्रहे च युगपद्वचनं ज्ञापकं युगपद्वचनस्य[४] ।

७ समुदायात्सिद्धमिति चेन्नैकार्थत्वात्समुदायस्य[५] ।

८ तयोरनेकार्थत्वाद्बहुवचनप्रसङ्ग इति चेन्न बहुत्वाभावात्[६] ।

९ अन्यवाचकेनान्यस्य वचनानुपपत्तिरिति चेत्प्लक्षस्य न्यग्रोधत्वान्न्यग्रोधस्य प्लक्षत्वात् स्वशब्देनाभिधानम् ।

---

१ प. पुस्तके इतः परमधिकम् । सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्य दक्षिणोत्तरपूर्वाणामित्येवमर्थम् । २ प पुस्तके °द्धे । ३ प. पुस्तके इतः परमधिकम् । शब्दपौर्वापर्यप्रयोगादर्थपौर्वापर्याभिधानम् । ४ प. पुस्तके इतः परमधिकम् । समुदायात्सिद्धम् । ५ प. पुस्तके इतः परमधिकम् । नैकार्थ्यम् । ६ प. पुस्तके इतः परमधिकम् । अन्यवाचकेनान्यस्य वचनानुपपत्तिः ।

१० कारणाद् द्रव्ये शब्दनिवेश इति चेत्तुल्य-कारणत्वात्सिद्धम् ।
११ दर्शनं हेतुरिति चेत्तुल्यम् ।
१२ तद्विषयं च
१३ अन्यत्रापि तद्विषयदर्शनात् ।
१४ एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः ।
१५ अभिधानं पुनः स्वाभाविकम्[१] ।
१६ एकादीनां दशादिभिर्द्वन्द्व इति चेद्विंशत्यादिषु वचनप्रसङ्गः ।
१७ सिद्धं त्वधिकान्ता संख्या संख्याया समानाधिकरणाधिकारेऽधिकलोपश्च ।

उपसर्जनं पूर्वम् ॥ ३० ॥

१ उपसर्जनस्य पूर्ववचनं परप्रयोग-निवृत्त्यर्थम् ।
२ न वानिष्टादर्शनात् ।
३ षष्ठ्यन्तयोः समासेऽर्थभेदात्प्रधानस्या-पूर्वनिपातः ।

राजदन्तादिषु परम् ॥ ३१ ॥

द्वन्द्वे घि ॥ ३२ ॥

अजाद्यदन्तम् ॥ ३३ ॥

अल्पाच्तरम् ॥ ३४ ॥

१ अतन्त्रे तरनिर्देशे शङ्खतूणवयोर्मृदङ्गेन समासः ।
२ अनेकप्राप्तावेकस्य नियमोऽनियमः शेषेषु
३ ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणाम् ।
४ अभ्यर्हितम् ।
५ लघ्वक्षरम्[२] ।
६ वर्णानामानुपूर्व्येण ।
७ भ्रातुश्च ज्यायसः ।
८ संख्याया अल्पीयसः[३] ।
९ धर्मादिषूभयम् ।

सप्तमीविशेषणे बहुव्रीहौ ॥ ३५ ॥

१ बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानम् ।
२ वा प्रियस्य ।
३ सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनम् ।

निष्ठा ॥ ३६ ॥

१ निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनम् ।
२ न वोत्तरपदस्यान्तोदात्तवचनं ज्ञापकं परभावस्य ।
३ प्रतिषेधे तु पूर्वनिपातप्रसङ्गस्तस्माद्राजदन्तादिषु पाठः ।
४ प्रहरणार्थेभ्यश्च ।
५ द्वन्द्वे घ्यजाद्यदन्तं विप्रतिषेधेन ।
६ उभाभ्यामल्पाच्तरम् ।

वाहिताग्न्यादिषु ॥ ३७ ॥

कडाराः कर्मधारये ॥ ३८ ॥[४]

॥ इति द्वितीयाध्यायस्य द्वितीयः पादः ॥

१ प. पुस्तके इतः परमधिकम् । एकादीनां दशादिभिर्द्वन्द्वः । २ प. पुस्तके इतः परमधिकम् । सर्वत एवाभ्यर्हितं पूर्वं निपततीति वाच्यम् । ३ प. पुस्तके । ०स्याः । ४ प. पुस्तके इतः परमधिकम् । कडारादय इति वक्तव्यम् ।

अनभिहिते ॥ १ ॥

१ अनभिहितवचनमनर्थकमन्यत्रापि विहितस्याभावादभिहिते ।

२ श्नम्बहुजकक्षु नानादेशत्वादुत्सर्गाप्रतिषेधः ।

३ अनभिहितस्तु विभक्त्यर्थस्तस्मादनभिहितवचनम् ।

४ अभिहिते प्रथमाभावः ।

५ तिङ्कृत्तद्धितसमासैः परिसंख्यानम् ।

६ उत्सर्गे हि प्रातिपदिकसामानाधिकरण्ये विभक्तिवचनम् ।

७ द्वयोः क्रिययोः कारकेऽन्यतरेणाभिहिते विभक्त्यभावप्रसङ्गः ।

८ न वान्यतरेणानभिधानात् ।

९ अनभिहिते हि विधानम् ।

१० अनभिहितवचनमनर्थकं प्रथमाविधानस्यानवकाशत्वात् ।

११ अवकाशोऽकारकमिति चेन्नास्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति ।

१२ विप्रतिषेधाद्वा प्रथमाभावः ।

१३ कृत्प्रयोगे तु परं विधानं षष्ठ्यास्तत्प्रतिषेधार्थम् ।

कर्मणि द्वितीया ॥ २ ॥

१ समयानिकषाहायोगेषूपसंख्यानम्[1] ।

तृतीया च होश्छन्दसि ॥ ३ ॥

अन्तरान्तरेणयुक्ते ॥ ४ ॥

१ अन्तरान्तरेणयुक्तानामप्रधानवचनम् ।

कालाध्वनोरत्यन्तसंयोगे ॥ ५ ॥

१ अत्यन्तसंयोगे कर्मवद्भावाद्यर्थम् ।

अपवर्गे तृतीया[2] ॥ ६ ॥

सप्तमीपञ्चम्यौ कारकमध्ये[3] ॥ ७ ॥

कर्मप्रवचनीययुक्ते द्वितीया ॥ ८ ॥

१ कर्मप्रवचनीययुक्ते प्रत्यादिभिश्च लक्षणादिषूपसंख्यानं सप्तमीपञ्चम्योः प्रतिषेधार्थम् ।

२ [4]उक्तं वा ।

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ॥ ९ ॥

१ यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेदवचनात्सिद्धम् ।

२ प्रथमानुपपत्तिस्तु ।

३ स्ववचनात्सिद्धम् ।

पञ्चम्यपाङ्परिभिः ॥ १० ॥

प्रतिनिधिप्रतिदाने च यस्मात् ॥ ११ ॥

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ॥ १२ ॥

१ अध्वन्यर्थग्रहणम् ।

२ आस्थितप्रतिषेधश्च ।

३ चेष्टायामनध्वनि स्त्रियं गच्छत्यजां नयतीत्यतिप्रसङ्गः ।

४ सिद्धं त्वसंप्राप्तवचनात् ।

५ अध्वनश्चानपवादः ।

---

१ प. पुस्तके इतः परमधिकम् । उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते । २ प. पुस्तके इतः परमधिकम् । क्रियापवर्ग इति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । क्रियामध्य इति वक्तव्यम् । ४ प. पुस्तके नास्ति ।

चतुर्थी संप्रदाने ॥ १३ ॥

१ चतुर्थीविधाने तादर्थ्य उपसंख्यानम् ।

२ क्लृपि संपद्यमाने ।

३ उत्पातेन ज्ञाप्यमाने ।

४ हितयोगे च ।

क्रियार्थोपपदस्य च कर्मणि स्थानिनः ॥

तुमर्थाच्च भाववचनात् ॥ १५ ॥

नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च ॥

१ स्वस्तियोगे चतुर्थी कुशलार्थैराशिषि वाविधानात् ।

२ अलमिति पर्याप्त्यर्थग्रहणम् ।

मन्यकर्मण्यनादरे विभाषाप्राणिषु॥१७॥

१ मन्यकर्मणि प्रकृष्ट्यकुत्सितग्रहणम् ।

कर्तृकरणयोस्तृतीया ॥ १८ ॥

१ तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानम् ।

सहयुक्तेऽप्रधाने ॥ १९ ॥

१ सहयुक्तेऽप्रधानवचनमनर्थकमुपपदविभक्तेः कारकविभक्तिर्बलीयस्त्वादन्यत्रापि ।

येनाङ्गविकारः ॥ २० ॥

१ अङ्गाद्विकृतात्तद्विकारतश्चेदङ्गिनो वचनम् ।

इत्थंभूतलक्षणे ॥ २१ ॥

१ इत्थंभूतलक्षणे तत्स्थे प्रतिषेधः ।

२ न वेत्थंभूतस्य लक्षणेनापृथग्भावात् ।

संज्ञो ऽन्यतरस्यां कर्मणि ॥ २२ ॥

१ संज्ञः कृत्प्रयोगे षष्ठी विप्रतिषेधेन ।

२ उपपदविभक्तेश्चोपपदविभक्तिः ।

हेतौ[३] ॥ २३ ॥

अकर्तर्यृणे पञ्चमी ॥ २४ ॥

विभाषा गुणे ऽस्त्रियाम् ॥ २५ ॥

षष्ठी हेतुप्रयोगे ॥ २६ ॥

सर्वनाम्नस्तृतीया च ॥ २७ ॥

अपादाने पञ्चमी ॥ २८ ॥

१ पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानम् ।

२ अधिकरणे च ।

३ प्रश्नाख्यानयोश्च ।

४ यतश्चाध्वकालनिर्माणम् ।

५ तद्युक्तात्काले सप्तमी ।

६ अध्वनः प्रथमा च ।

अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते ॥ २९ ॥

षष्ठ्यतसर्थप्रत्ययेन ॥ ३० ॥

एनपा द्वितीया ॥ ३१ ॥

पृथग्विनानानाभिस्तृतीयान्यतरस्याम् ।

१ पृथगादिषु पञ्चमीविधानम् ।

२ अनधिकारात् ।

३ अधिकारे हि द्वितीयाषष्ठीविषये प्रतिषेधः ।

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य ॥ ३३ ॥

दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ॥३४॥

---

१ प. पुस्तके इतः परमधिकम् । यदेतदप्राणिष्विरयेतदनावादिष्विति वक्ष्यामि । २ प्रतिकृष्येति कैयटः ।
३ प. पुस्तके इतः परमधिकम् । निमित्तकारणहेतुषु सर्वासां प्रायदर्शनं प्रायोदर्शनं वा ।

दूरान्तिकार्थेभ्यो द्वितीया च ॥ ३५ ॥

१ दूरान्तिकार्थेभ्यः पञ्चमीविधाने तद्युक्तात्पञ्चमीप्रतिषेधः ।

२ न वा तत्रापि दर्शनादप्रतिषेधः ।

सप्तम्यधिकरणे च ॥ ३६ ॥

१ सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् ।

२ साध्वसाधुप्रयोगे च ।

३ कारकार्हाणां च कारकत्वे ।

४ अकारकार्हाणां चाकारत्वे ।

५ तद्विपर्यासे च ।

६ निमित्तात्कर्मसंयोगे[१] ।

यस्य च भावेन भावलक्षणम् ॥ ३७ ॥

१ भावलक्षणे सप्तमीविधानेऽभावलक्षण उपसंख्यानम् ।

२ सिद्धं तु भावप्रवृत्तौ यस्य भावारम्भवचनात् ।

षष्ठी चानादरे ॥ ३८ ॥

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥ ३९ ॥

आयुक्तकुशलाभ्यां चासेवायाम् ॥ ४० ॥

यतश्च निर्धारणम् ॥ ४१ ॥

पञ्चमी विभक्ते ॥ ४२ ॥

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः[२] ॥

प्रसितोत्सुकाभ्यां तृतीया च ॥ ४४ ॥

नक्षत्रे च लुपि ॥ ४५ ॥

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥ ४६ ॥

१ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमालक्षणे पदसामानाधिकरण्य उपसंख्यानमधिकत्वात् ।

२ न वा वाक्यार्थत्वात् ।

३ अभिहितलक्षणायामनभिहिते प्रथमाविधिः ।

४ [३]उक्तं वा ।

५ अभिहितानभिहिते प्रथमाभावः ।

६ तिङ्समानाधिकरण इति चेत्तिङोऽप्रयोगे प्रथमाविधिः ।

७ [४]उक्तं पूर्वेण ।

८ शतृशानचोश्च निमित्तभावात्तिङोऽभावस्तयोरपवादत्वात् ।

संबोधने च ॥ ४७ ॥

सामन्त्रितम् ॥ ४८ ॥

एकवचनं संबुद्धिः ॥ ४९ ॥

षष्ठी शेषे ॥ ५० ॥

१ प्रत्ययावधारणाच्छेषवचनम् ।

२ अर्थावधारणाद्वा ।

३ षष्ठी शेष इति चेद्विशेष्यस्य प्रतिषेधः ।

४ तत्र प्रथमाविधिः ।

५ [५]उक्तं पूर्वेण ।

ज्ञो ऽविदर्थस्य करणे ॥ ५१ ॥

अधीगर्थदयेशां कर्मणि ॥ ५२ ॥

१ कर्मादिष्वकर्मकवद्वचनम् ।

१ प. पुस्तके कर्मयोगे । २ प. पुस्तके इतः परमधिकम् । अप्रत्यादिभिरिति (पा. सू. १. ४. ९०) वक्तव्यम् । ३–५ प. पुस्तके नास्ति ।

२ कर्माभिधाने हि[1] लिङ्गवचनानुपपत्तिः ।
३ षष्ठीप्रसङ्गश्च ।
कृञः प्रतियत्ने ॥ ५३ ॥
रुजार्थानां भाववचनानामज्वरेः[2] ॥५४॥
आशिषि नाथः ॥ ५५ ॥
जासिनिप्रहणनाटक्राथपिषां हिंसायाम् ॥ ५६ ॥
व्यवहृपणोः समर्थयोः ॥ ५७ ॥
दिवस्तदर्थस्य ॥ ५८ ॥
विभाषोपसर्गे ॥ ५९ ॥
द्वितीया ब्राह्मणे ॥ ६० ॥
प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने ॥ ६१ ॥
१ हविषोऽप्रस्थितस्य ।
चतुर्थ्यर्थे बहुलं छन्दसि ॥ ६२ ॥
१ षष्ठ्यर्थे चतुर्थीवचनम् ।
यजेश्च करणे ॥ ६३ ॥
कृत्वोऽर्थप्रयोगे कालेऽधिकरणे ॥६४॥
कर्तृकर्मणोः कृति ॥ ६५ ॥
१ कर्तृकर्मणोः षष्ठीविधाने कृद्ग्रहणानर्थक्यं लप्रतिषेधात् ।
२ तस्य कर्मकर्त्रर्थमिति चेत्प्रतिषेधेऽपि तदन्तकर्मकर्तृत्वात्सिद्धम् ।
उभयप्राप्तौ कर्मणि ॥ ६६ ॥
१ उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधेऽकादिप्रयोगेऽप्रतिषेधः ।
क्तस्य च वर्तमाने ॥ ६७ ॥
१ क्तस्य च वर्तमाने नपुंसके भाव उपसंख्यानम् ।
२ शेषविज्ञानात्सिद्धम् ।
अधिकरणवाचिनश्च ॥ ६८ ॥
न लोकाव्ययनिष्ठाखलर्थतृनाम् ॥६९॥
१ लादेशे सल्लिङ्ग्रहणं किकिनोः प्रतिषेधार्थम् ।
२ तयोरलादेशत्वात् ।
३ उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः ।[3]
४ अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः ।[4]
५ शानंश्चानश्शतृणामुपसंख्यानम् ।
६ द्विषः शतुर्वावचनम् ।
अकेनोर्भविष्यदाधमर्ण्ययोः ॥ ७० ॥
१ अकस्य भविष्यति ।
२ इन आधमर्ण्ये च ।
कृत्यानां कर्तरि वा ॥ ७१ ॥
१ भव्यादीनां कर्मणोऽनभिधानात्कृत्यानां कर्तृग्रहणम् ।
तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् ॥ ७२ ॥
चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ॥ ७३ ॥
॥ इति द्वितीयाध्यायस्य तृतीयः पादः ॥

---

[1] प. पुस्तके अत्र 'हि' नास्ति । [2] प. पुस्तके इतः परमधिकम् । अज्वरिसंताप्योरिति वक्तव्यम् । [3] प. पुस्तके इतः परमधिकम् । अकाकारयोः प्रयोगे प्रतिषेधो नेति वक्तव्यम् । शेषे विभाषा । [4] प. पुस्तके इतः परमधिकम् । उकारप्रयोगे नेति वक्तव्यम् ।

द्विगुरेकवचनम् ॥ १ ॥

१ प्रत्यधिकरणं वचनोत्पत्तेः संख्यासामानाधिकरण्याच्च द्विगोरेकवचनविधानम् ।

२ तत्रानुप्रयोगस्यैकवचनाभावोऽद्विगुत्वात् ।

३ सिद्धं तु द्विग्वर्थस्यैकवद्वचनात् ।

४ एकशेषप्रतिषेधश्च ।

५ न वान्यस्यानेकत्वात् ।

६ समाहारग्रहणं च तद्धितार्थप्रतिषेधार्थम् ।

७ न वा समाहारैकत्वात् ।

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् ॥ २ ॥

१ प्राणितूर्यसेनाङ्गानां तत्पूर्वपदोत्तरपदग्रहणम् ।

२ योगविभागात्सिद्धम् ।

अनुवादे चरणानाम् ॥ ३ ॥

१ स्थेणोः ।

२ अद्यतन्यां च ।

अध्वर्युक्रतुरनपुंसकम् ॥ ४ ॥

अध्ययनतोऽविप्रकृष्टाख्यानाम् ॥ ५ ॥

जातिरप्राणिनाम् ॥ ६ ॥

विशिष्टलिङ्गो नदी देशोऽग्रामाः ॥ ७ ॥

१ ग्रामप्रतिषेधे नगरप्रतिषेधः ।

२ उभयतश्च ग्रामाणाम् ।

क्षुद्रजन्तवः ॥ ८ ॥

येषां च विरोधः शाश्वतिकः ॥ ९ ॥

शूद्राणामनिरवसितानाम् ॥ १० ॥

गवाश्वप्रभृतीनि च ॥ ११ ॥

१ गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तम् ।

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् ॥ १२ ॥

१ बहुप्रकृतिः फलसेनावनस्पतिमृगशकुन्तक्षुद्रजन्तुधान्यतृणानाम् ।

२ पशुशकुनिद्वन्द्वे विरोधिनां पूर्वविप्रतिषिद्धम् ।

३ अश्ववडवयोः पूर्वलिङ्गत्वात्पशुद्वन्द्वनपुंसकम् ।

४ प्रतिपदविधानात्सिद्धम् ।

५ एकवचनमनर्थकं समाहारैकत्वात् ।

विप्रतिषिद्धं चानधिकरणवाचि ॥ १३ ॥

न दधिपयआदीनि ॥ १४ ॥

अधिकरणैतावत्त्वे च ॥ १५ ॥

विभाषा समीपे ॥ १६ ॥

स नपुंसकम् ॥ १७ ॥

अव्ययीभावश्च ॥ १८ ॥

तत्पुरुषोऽनञ्कर्मधारयः ॥ १९ ॥

संज्ञायां कन्थोशीनरेषु ॥ २० ॥

उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ॥ २१ ॥

छाया बाहुल्ये ॥ २२ ॥

सभा राजामनुष्यपूर्वा ॥ २३ ॥

अशाला च ॥ २४ ॥

विभाषा सेनासुराछायाशालानिशानाम् ॥ २५ ॥

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ॥ २६ ॥

१ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति चेत्प्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधः ।

२ पूर्वपदस्य च ।

३ समासादन्यलिङ्गमिति चदेश्ववडवयोर्द्विवचनम् ।

४ निपातनात्सिद्धम् ।

५ उपसर्जनह्रस्वत्वं वा ।

६ परवल्लिङ्गमिति शब्दशब्दार्थौ ।

७ प्राप्तादिषु चैकदेशिग्रहणात्सिद्धम् ।

पूर्ववदश्ववडवौ ॥ २७ ॥

हेमन्तशिशिरावहोरात्रे च च्छन्दसि २८

रात्राह्नाहाः पुंसि ॥ २९ ॥

१ अनुवाकादयः पुंसि ।[1]

अपथं नपुंसकम् ॥ ३० ॥

१ पथः संख्याव्ययादेः ।

२ द्विगुश्च[2] ।

३ वावन्तः ।[3]

अर्धर्चाः पुंसि च[4] ॥ ३१ ॥

इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ॥ ३२ ॥

१ अन्वादेशे समानाधिकरणग्रहणं देवदत्तं भोजयेमं चेत्यप्रसङ्गार्थम् ।

२ अन्वादेशश्च कथितानुकथनमात्रम् ।

३ आदेशवचनं साकच्कार्थम् ।

४ शित्करणं सर्वादेशार्थम् ।

५ न वान्त्यस्य विकारवचनानर्थक्यात् ।

६ अर्थवत्त्वादेशप्रतिषेधार्थम् ।

७ तस्माच्छित्करणम् ।

एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥३३॥

द्वितीयाटौस्स्वेनः ॥ ३४ ॥

१ एनदिति नपुंसकैकवचने ।

आर्धधातुके ॥ ३५ ॥

१ जग्ध्यादिष्वार्धधातुकाश्रयत्वात्सति तस्मिन्विधानम् ।

२ तत्रोत्सर्गलक्षणप्रतिषेधः[5] ।

३ सामान्याश्रयत्वाद्विशेषस्यानाश्रय इति चेदुवर्णाकारान्तेभ्यो ण्यद्विधिप्रसङ्गः ।

४ पौर्वापर्याभावाच्च सामान्येनानुपपत्तिः ।

५ सिद्धं तु सार्वधातुके प्रतिषेधात् ।

अदो जग्धिर्ल्यप्ति किति ॥ ३६ ॥

लुङ्सनोर्घस्लृ ॥ ३७ ॥

१ घस्लभावेऽच्युपसंख्यानम् ।

घञपोश्च ॥ ३८ ॥

बहुलं छन्दसि ॥ ३९ ॥

लिट्यन्यतरस्याम् ॥ ४० ॥

वेञो वयिः ॥ ४१ ॥

हनो वध लिङि ॥ ४२ ॥

लुङि च ॥ ४३ ॥

१ वधौ व्यञ्जनान्त उक्तम्[6] ।

आत्मनेपदेष्वन्यतरस्याम् ॥ ४४ ॥

इणो गा लुङि ॥ ४५ ॥

१ इण्वदिकः ।

णौ गमिरबोधने ॥ ४६ ॥

सनि च ॥ ४७ ॥

इङश्च ॥ ४८ ॥

गाङ् लिटि ॥ ४९ ॥

१ गाङ्यनुबन्धकरणं विशेषणार्थम् ।

---

१ प. पुस्तके इतः परमधिकम् । पुण्यसुदिनाभ्यामह्नो नपुंसकत्वं वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत इति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । पात्रादिभ्यः प्रतिषेधो वक्तव्यः । ४ प. पुस्तके इतः परमधिकम् । अर्धर्चादय इति वक्तव्यम् । ५ प. पुस्तके इतः परमधिकम् । सामान्याश्रयत्वाद्विशेषस्यानाश्रये । ६ प. पुस्तके नास्ति

२ ज्ञापकं वा सानुबन्धकस्यादेशवचन इत्कार्याभावस्य ।

३ प्रयोजनं चक्षिङः ख्याञ् ।

४ लटः शतृशानचौ ।

५ युवोरनाकौ ।

६ मेश्चाननुबन्धकस्याम्वचनम् ।

विभाषा लुङ्लृङोः ॥ ५० ॥

णौ च संश्चङोः ॥ ५१ ॥

अस्तेर्भूः ॥ ५२ ॥

ब्रुवो वचिः ॥ ५३ ॥

चक्षिङः ख्याञ् ॥ ५४ ॥

१ चक्षिङः क्शाञ्ख्याञौ ।

२ खशादिर्वा ।

३ असिद्धे शस्य यवचनं विभाषा ।

४ प्रयोजनं सौप्रख्ये वुञ्विधिः ।

५ निष्ठानत्वमाख्याते ।

६ रुविधिः पुंख्याने ।

७ णत्वं पर्याख्याने ।

८ सस्थानत्वं नमःख्यात्रे ।

९ वर्जने प्रतिषेधः ।

१० असनयोश्च ।

११ बहुलं तणि ।

१२ अन्नवधकगात्रविचक्षणाजिराद्यर्थम् ।

वा लिटि ॥ ५५ ॥

अजेर्व्यघञपोः ॥ ५६ ॥

१ घञपोः प्रतिषेधे क्यप उपसंख्यानम् ।

वा यौ ॥ ५७ ॥

ण्यक्षत्रियार्षञितो यूनि लुगणिञोः ॥५८॥

१ अणिञोर्लुकि तद्राजाद्युवप्रत्ययस्योपसंख्यानम्[२] ।

पैलादिभ्यश्च ॥ ५९ ॥

इञः प्राचाम् ॥ ६० ॥

न तौल्वलिभ्यः ॥ ६१ ॥

तद्राजस्य बहुषु तेनैवास्त्रियाम् ॥ ६२ ॥

१ तद्राजादीनां लुकि समासबहुत्वे प्रतिषेधः ।

२ अबहुत्वे च लुग्वचनम् ।

३ द्वन्द्वेऽबहुषु लुग्वचनम् ।

४ सिद्धं तु प्रत्ययार्थबहुत्वे लुग्वचनात् ।

५ द्वन्द्वेऽबहुषु लुग्वचनम् ।

६ गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक् ।

७ एकवचनाद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि ।

८ न वा सर्वेषां द्वन्द्वे बह्वर्थत्वात् ।

यस्कादिभ्यो गोत्रे ॥ ६३ ॥

यञञोश्च ॥ ६४ ॥

१ यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानम् ।

अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ॥

बह्वच इञः प्राच्यभरतेषु ॥ ६६ ॥

न गोपवनादिभ्यः ॥ ६७ ॥

१ गोपवनादिप्रतिषेधः प्राग्घरितादिभ्यः ।

---

१ प. पुस्तके काशिकास्थः पाठः । वलादावार्धधातुके । २ प. पुस्तके इतः परमधिकम् । आणिञोर्लुकि क्षत्रियगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम् । अनाह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम् ।

तिककितवादिभ्यो द्वन्द्वे ॥ ६८ ॥

उपकादिभ्यो ऽन्यतरस्यामद्वन्द्वे ॥६९॥

१ अद्वन्द्व इति द्वन्द्वाधिकारनिवृत्त्यर्थम् ।

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ॥ ७० ॥

१ आगस्त्यकौण्डिन्ययोः प्रकृतिनिपातनम् ।

२ लुक्प्रतिषेधे वृद्ध्यर्थम् ।

३ प्रत्ययान्तनिपातने हि वृद्ध्यभावः ।

४ अधिकारात्प्रत्ययलोपः ।

सुपो धातुप्रातिपदिकयोः ॥ ७१ ॥

अदिप्रभृतिभ्यः शपः ॥ ७२ ॥

बहुलं छन्दसि ॥ ७३ ॥

यङो ऽचि च ॥ ७४ ॥

१ ऊतोऽचि ।

जुहोत्यादिभ्यः श्लुः ॥ ७५ ॥

बहुलं छन्दसि ॥ ७६ ॥

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ॥ ७७ ॥

१ गापोर्ग्रहण इण्पिबत्योर्ग्रहणम् ।

विभाषा घ्राधेट्शाच्छासः ॥ ७८ ॥

तनादिभ्यस्तथासोः ॥ ७९ ॥

१ तथासोरात्मनेपदवचनम् ।

२ एकवचनग्रहणं वा ।

३ अवचने ह्यनिष्टप्रसङ्गः ।

मन्त्रे घसह्वरणशवृहदहाद्वृच्कृगमिजनिभ्यो लेः ॥ ८० ॥

आमः ॥ ८१ ॥

१ आमो लेर्लोपे लुङ्लोटोरुपसंख्यानम् ।

२ आमन्तेभ्यो णलः प्रतिषेधः[१] ।

३ आमन्तेभ्योऽर्थवद्ग्रहणाण्णलोऽप्रतिषेध-इति चेदमः प्रतिषेधः ।

४ उक्तं वा ।

५ लुगादेशापवादः ।

६ तिङ्कृताभावस्तु ।

७ सुबन्तपदत्वात्सिद्धम् ।

८ लकारस्य कृत्त्वात्प्रातिपदिकत्वं तदाश्रयं प्रत्ययविधानम् ।

९ अव्ययत्वं मकारान्तत्वात् ।

१० स्वरः कृदन्तप्रकृतिस्वरत्वात् ।

११ तथा च निघातानिघातसिद्धिः ।

१२ नञा तु समासप्रसङ्गः ।

१३ उक्तं वा ।

अव्ययादाप्सुपः ॥ ८२ ॥

१ अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावात् ।

नाव्ययीभावादतो ऽम् त्वपञ्चम्याः ॥८३॥

१ नाव्ययीभावादत इति योगव्यवसानम् ।

२ पञ्चम्या अम्प्रतिषेधार्थम् ।

३ एकयोगे ह्युभयोः प्रतिषेधः[४] ।

४ अमि पञ्चमीप्रतिषेधेऽपादानग्रहणम् ।

५ कर्मप्रवचनीययुक्तेऽप्रतिषेधार्थम् ।

६ न वोत्तरपदस्य कर्मप्रवनीययोगात्समासात्पञ्चम्यभावः ।

तृतीयासप्तम्योर्बहुलम् ॥ ८४ ॥

---

१ प. इतः परमधिकम् । आमन्तेभ्योऽर्थवद्ग्रहणाण्णलोऽप्रतिषेधः । २-३ प. पुस्तके नास्ति । ४ प. पुस्तके इतः परमधिकम् । तुर्नियामकः ।

१ सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यम् ।

लुटः प्रथमस्य डारौरसः ॥ ८५ ॥

१ टितां टेरेविधेर्लुटो डारौरसः पूर्वविप्रतिषिद्धम् ।

२ आत्मनेपदानां चेति वचनात्सिद्धम् ।

३ तच्च समसंख्यार्थम् ।

४ डाविकारस्य शित्करणं सर्वादेशार्थम् ।

५ निघातप्रसङ्गस्तु ।

६ सिद्धमलोऽन्त्यविकारात् ।

७ डिति टेर्लोपाल्लोपः ।

८ अनित्त्वाद्वा ।

९ प्रश्लिष्टनिर्देशाद्वा ।

१० तिङ्ग्रहणमेकदेशविकृतस्यानन्यत्वात् ।

११ स्वरे विप्रतिषेधात्सिद्धम् ।

॥ इति द्वितीयाध्यायस्य चतुर्थः पादः ॥

प्रत्ययः ॥ १ ॥

१ प्रत्ययाधिकारे प्रकृत्युपपदोपाधीनामप्रतिषेधः ।

२ निमित्तस्य निमित्तिकार्यार्थत्वादन्यत्रापि ।

३ प्रधाने कार्यसंप्रत्ययाद्वा सिद्धम् ।

४ विकारागमेषु च परविज्ञानात् ।

५ षष्ठीनिर्दिष्टस्य च तद्युक्तत्वात् ।

६ प्रत्ययविधानानुपपत्तिस्तु ।

७ तस्मात्तत्र पञ्चमीनिर्देशात्सिद्धम् ।

८ अर्थाश्रयत्वाद्वा ।

परश्च ॥ २ ॥

१ परवचनमनर्थकं पञ्चमीनिर्दिष्टाद्धि परस्य ।

२ विकारागमेषु चोक्तम्[1] ।

३ अत्यन्तापरदृष्टानां वा परभूतलोपार्थम् ।

४ प्रयोगनियमार्थं वा ।

५ प्रकृतेरर्थाभिधाने प्रत्ययादर्शनात् ।

६ द्वयसजादीनां च केवलदृष्टत्वात् ।

७ वावचने चानुत्पत्त्यर्थम् ।

८ वावचने[2] चोक्तम् ।

९ तत्र प्रत्ययानियमे प्रकृतिनियमाभावः ।

१० प्रकृतिनियमे प्रत्ययानियमः ।

११ सिद्धं तूभयनियमात् ।

आद्युदात्तश्च ॥ ३ ॥

१ आद्युदात्तत्वस्य प्रत्ययसंज्ञासंनियोगे प्रयोजनं यस्य संज्ञाकरणं तस्याद्युदात्तार्थम् ।

२ असंनियागे हि यस्मात्स तदादेराद्युदात्तत्वं तदन्तस्य चानुदात्तत्वम् ।

३ न वा प्रकृतेराद्युदात्तवचनं ज्ञापकं तदादेरग्रहणस्य ।

४ प्रकृतिस्वरस्य च[3] विधानसामर्थ्यात्प्रत्ययस्वराभावः ।

५ आगमानुदात्तार्थं वा ।

६ न वागमस्यानुदात्तवचनात् ।

७ अवचने हि सीयुडादेराद्युदात्तत्वम् ।

८ आद्युदात्तस्य वा लोपार्थम् ।

९ न वा बहिरङ्गलक्षणत्वात् ।

१० अवचने हि ञिनिकित्स्वतिप्रसङ्गः ।

११ प्रत्ययाद्युदात्तत्वाद्धातोरन्तः ।

१२ पित्स्वरात्तित्स्वरष्टापि ।

१-२ प. पुस्तके नास्ति । ३ प. पस्तके 'च' नास्ति ।

१३ चित्स्वरश्चापि पित्स्वरात् ।
१४ न वाद्युदात्तस्य प्रत्ययसंज्ञासंनियोगात् ।
१५ टापि स्वरितेनैकादेशः ।
१६ चापि चित्करणात् ।

अनुदात्तौ सुप्पितौ ॥ ४ ॥

गुप्तिज्किद्भ्यः सन् ॥ ५ ॥

१ गुपादिष्वनुबन्धकरणमात्मनेपदार्थम्[1] ।

मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ॥ ६ ॥

१ अभ्यासदीर्घत्वेऽवर्णस्य दीर्घप्रसङ्गः ।
२ न वाभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात्[2] ।

धातोः कर्मणः समानकर्तृकादिच्छायां वा ॥ ७ ॥

१ कर्मग्रहणात्सन्निधौ धातुग्रहणानर्थक्यम् ।
२ सोपसर्गं कर्मेति चेत्कर्मविशेषकत्वादुपसर्गस्यानुपसर्गं कर्म ।
३ सोपसर्गस्य हि कर्मत्वे धात्वधिकारेऽपि सनोऽविधानमकर्मकत्वात् ।
४ सुबन्ताच्चाप्रसङ्गः क्यजादीनामपवादत्वात् ।
५ अनभिधानाद्वा ।
६ कर्मसमानकर्तृकग्रहणानर्थक्यं चेच्छाभिधाने प्रत्ययविधानात् ।
७ अकर्मणो ह्यसमानकर्तृकाद्वानभिधानम् ।
८ अङ्गपरिमाणार्थं तु ।
९ वावचनानर्थक्यं च तत्र नित्यत्वात्सनः ।
१० तुमुनन्ताद्वा तस्य च लुग्वचनम् ।
११ लिङुत्तमाद्वा[3] ।
१२ आशङ्कायामचेतनेषूपसंख्यानम् ।
१३ न वा तुल्यकारणात्वादिच्छाया हि प्रवृत्तित उपलब्धिः ।
१४ उपमानाद्वा सिद्धम् ।
१६ सर्वस्य वा चेतनावत्त्वात् ।

सुप आत्मनः क्यच्[4] ॥ ८ ॥

१ क्यचि मान्ताव्ययप्रतिषेधः ।
२ गोसमानाक्षरनान्तादित्येके ।

काम्यच्च ॥ ९ ॥

१ काम्यचश्चित्करणानर्थक्यं कस्येदर्थभावात् ।

उपमानादाचारे ॥ १० ॥

१ अधिकरणाच्च ।

कर्तुः क्यङ् सलोपश्च ॥ ११ ॥

१[5] सलोपो वा ।
२ ओजोऽप्सरसोर्नित्यम्[6] ।
३ आचारे गल्भक्लीवहोडेभ्यः क्विब्वा ।

---

१ प. पुस्तके इतः परमधिकम् । गुपेर्निन्दायाम् का. । तिजः क्षमायाम् का. । कितेर्व्याधिप्रतिकारे का. । २ प. पुस्तके इतः परमधिकम् । मानेर्जिज्ञासायाम् का. । वधेर्वैरूप्ये का. । दानेरार्जवे का. । शानेर्निशाने का. । ३ प. पुस्तके नास्ति । ४ प. पुस्तके इतः परमधिकम् । छन्दस्यघशब्दात्परेच्छायां क्यज् । समानाधिकरणानां सर्वत्रावृत्तिरयोगादेकेन । द्वितीयानुपपत्तिस्तु । ५ प. पुस्तके इतः परमधिकम् । सलोपोऽप्सरस एव । ६ प. पुस्तके इतः परमधिकम् । सर्वप्रातिपदिकेभ्य आचारे क्विब्वक्तव्योऽश्वति गर्दभतीत्येवमर्थम् ।

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ॥१२॥

१ भृशादिष्वभूततद्भावग्रहणम् ।

२ च्विप्रतिषेधानर्थक्यं च भवत्यर्थे क्यङ्वचनात् ।

३ भवतियोगे च्विविधानम् ।

४ डाचि वचनप्रामाण्यात् ।

५ भृशादिषूपसर्गः प्रत्ययार्थविशेषणमिति-चेत्स्वरे दोषः ।

६ सोपसर्गादिति चेदटि दोषः ।

लोहितादिडाज्भ्यः क्यष् ॥ १३ ॥

१ लोहितडाज्भ्यः क्यष्वचनम् ।

२ भृशादिष्वितराणि ।

कष्टाय क्रमणे ॥ १४ ॥

१ सत्रकक्षकष्टगहनेभ्यः कण्वचिकीर्षायाम् ।

कर्मणो रोमन्थतपोभ्यां वर्तिचरोः ।१५

१ तपसः परस्मैपदं च ।

बाष्पोष्मभ्यामुद्वमने[3] ॥ १६ ॥

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे[4] ॥ १७ ॥

१ सुदिनदुर्दिनाभ्यां च ।

२ नीराहाच्च ।

सुखादिभ्यः कर्तृवेदनायाम् ॥ १८ ॥

नमोवरिवश्चित्रङः क्यच् ॥ १९ ॥

१ नमसः क्याचि द्वितीयानुपपत्तिः ।

२ प्रकृत्यन्तरत्वात्सिद्धम् ।

३ क्यजादिषु प्रत्ययार्थनिर्देशः ।

पुच्छभाण्डचीवराण्णिङ् ॥ २० ॥

मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ॥ २१ ॥

१ हलिकल्योरत्वनिपातनं सन्वद्भावप्रतिषेधार्थम्[6] ।

धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ॥ २२ ॥

१ यङ्विधौ धातुग्रहणे उक्तम् ।

२ एकाज्झलादिग्रहणे च ।

३ ऊर्णोतेश्चोपसंख्यानम्[7] ।

४ क्रियासमभिहारे यङो विप्रतिषेधेन लोड्विधानम् ।

५ न वा नानार्थत्वात्कर्तृकर्मणोर्हि लविधानं क्रियाविशेषे स्वार्थे यङ् ।

६ उत्तरयोर्विग्रहेण विशेषासंप्रत्ययान्नित्यग्रहणानर्थक्यम् ।

७ क्रियासमभिहारे च नैतेभ्यः ।

नित्यं कौटिल्ये गतौ ॥ २३ ॥

लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् ॥ २४ ॥

---

१ प. पुस्तके 'अडल्यविद्वर्वचनेषु' इत्यधिकम् । २ प. पुस्तके इतः परमाधिकम् । हनु चलने इति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । फेनाच्चेति वक्तव्यम् । ४ प. पुस्तके इतः परमाधिकम् । अटाट्टाशीकाकोटापोटासोटाप्रुष्टाप्लुष्टाग्रहणम् । ५ प. पुस्तके इतः परमाधिकम् । नमसः पूजायाम् भा. । वरिवसः परिचर्यायाम् भा. । चित्रङ आश्चर्ये । भाण्डात्समाचयने भा. । चीवरादर्जने परिधाने वा भा. । पुच्छादुदसने व्यसने पर्यसने च भा. । ६ प. पुस्तके °रदन्तत्व° पाठः । ७ प. पुस्तके इतः परमाधिकम् सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णुग्रहणं यङ्विधावनेकाजहलाद्यर्थम् । वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम् । आमश्च प्रतिनिषेधार्थमेकाचश्चेड्डुपग्रहात् ॥

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ॥२५॥

१ सत्यस्य कृञ्यापुक्च ।

२ णिविधावर्थवेदसत्यानामापुक्च ।

हेतुमति च ॥ २६ ॥

१ हेतुमतीति कारकोपादानं प्रत्ययार्थपरिग्रहार्थं यथा तनूकरणे तक्षः ।

२ हेतुनिर्देशश्च निमित्तमात्रं भिक्षादिषु दर्शनात्[1] ।

३ कृष्यादिषु चानुत्पत्तिर्नानाक्रियाणां कृष्यर्थत्वात्[2] ।

४ यज्यादिषु चाविपर्यासो नानाक्रियाणां यज्यर्थत्वात् ।

५ तत्करोतीत्युपसंख्यानं सूत्रयत्याद्यर्थम् ।

६ आख्यानात्कृतस्तदाचष्ट इति कृल्लुक् प्रकृतिपत्त्यापत्तिः प्रकृतिवच्च कारकम् ।

७ आख्यानाच्च प्रतिषेधः ।

८ दृश्यर्थायां च प्रवृत्तौ ।

९ आङ्लोपश्च कालात्यन्तसंयोगे मर्यादायाम् ।

१० चित्रीकरणे प्रापि ।

११ नक्षत्रयोगे ज्ञि ।

१२ न वा सामान्यकृतत्वाद्धेतुतो ह्यविशिष्टम् ।

१३ स्वतन्त्रप्रयोजकत्वादप्रयोजक इति चेन्मुक्तसंशयेन तुल्यम् ।

१४ प्रवृत्तिर्ह्युभयत्रानपेक्ष्य ।

१५ कुर्वतः प्रयोजक इति चेत्तुल्यम् ।

कण्ड्वादिभ्यो यक् ॥ २७ ॥

१ कण्ड्वादिभ्यो वावचनम् ।

२ अवचने हि नित्यप्रत्ययत्वम् ।

३ तत्र धातुविधितुक्प्रतिषेधः

४ ह्रस्वयलोपौ च ।

गुपूधूपविच्छिपणिपनिभ्य आयः । २८ ।

ऋतेरीयङ् ॥ २९ ॥

कमेर्णिङ् ॥ ३० ॥

१ णिङि णित्करणस्य सावकाशत्वाद्वृद्धिप्रतिषेधप्रसङ्गः ।

२ मित्प्रतिषेधस्य चार्थवत्त्वात् ।

३ उक्तं[3] वा ।

आयादय आर्धधातुके वा ॥ ३१ ॥

१ आयादिभ्यो यदार्धधातुकमायादिप्रकृतेर्यदार्धधातुकमिति चोभयथानिष्टप्रसङ्गः

२ सिद्धं तु सार्वधातुके नित्यवचनादनाश्रित्य वाविधानम् ।

३ स्यादिवालीयस्त्वं तु विप्रतिषेधेन तुल्यानिमित्तत्वात् ।

४ न वायादिविधानस्यानवकाशत्वात् ।

सनाद्यन्ता धातवः ॥ ३२ ॥

१ सनादिष्वन्तग्रहण[4] उक्तम् ।

स्यतासी लृलुटोः[5] ॥ ३३ ॥

१ प. पुस्तके इतः परमधिकम् । कृष्यादिषु चानुत्पत्तिः । २ प. पुस्तके इतः परमधिकम् । यज्यादिषु चाविपर्यासः । ३ प. पुस्तके नास्ति । ४ प. पुस्तके नास्ति । ५ प. पुस्तके इतः परमाधिकम् । अपवादविप्रतिषेधाच्छ्वादिबाधनम् । अपवादो नामानेकलक्षणप्रसङ्गः । अपवादविप्रतिषेधाच्छ्यनादिबाधनम् ।

सिब्बहुलं लेटि ॥ ३४ ॥

१ सिबुत्सर्गश्छन्दसि ।

२ सनाद्यन्ते नेषत्वाद्यर्थः ।

३ प्रकृत्यन्तरत्वात्सिद्धम् ।

४ नेषतु[1] नेष्टादिति दर्शनात् ।

५ पित्करणानर्थक्यं चानच्कत्वात् ।

६ इटोऽनुदात्तार्थमिति चेदागमानुदात्तत्वात्सिद्धम् ।

७ सिब्बहुलं छन्दसि णित् ।

कास्प्रत्ययादाममन्त्रे लिटि ॥ ३५ ॥

१ कास्ग्रहणे चकास उपसंख्यानम्[2] ।

इजादेश्च गुरुमतोऽनृच्छः ॥ ३६ ॥

१ गुरुमत आम्विधाने लिण्निमित्तात्प्रतिषेधः

२ गुरुमद्वचनं किमर्थमिति चेण्णल्युत्तमे यजादिप्रतिषेधार्थम् ।

३ उपदेशवचनात्सिद्धम्[3] ।

४ ऋच्छिप्रतिषेधो ज्ञापक उच्छेराम्भावस्य ।

५ ऊर्णुक्तं वा ।

६ ऊर्णोतेश्चोपसंख्यानम् ।

दयायासश्च ॥ ३७ ॥

उषविदजागृभ्योऽन्यतरस्याम् ॥ ३८ ॥

१ [4]विदेराम् कित् ।

भीह्रीभृहुवां श्लुवच्च ॥ ३९ ॥

१ श्लुवदतिदेशे प्रयोजनं द्वित्वेत्त्वे ।

कृञ् चानुप्रयुज्यते लिटि ॥ ४० ॥

१ कृञोऽनुप्रयोगवचनमस्तिभूप्रतिषेधार्थम् ।

२ आत्मनेपदविध्यर्थं च ।

३ इष्टः सर्वानुप्रयोगः ।

४ सर्वानुप्रयोग इति चेदशिष्यमर्थाभावात् ।

५ अर्थाभावाच्चान्यस्य ।

६ लिट्परार्थं वा ।

७ अर्थसमासेर्वानुप्रयोगो न स्यात् ।

८ विपर्यासनिवृत्त्यर्थं वा ।

९ व्यवहितनिवृत्त्यर्थं च ।

विदांकुर्वन्त्वित्यन्यतरस्याम् ॥ ४१ ॥

अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति च्छन्दसि ॥ ४२ ॥

च्लि लुङि ॥ ४३ ॥

१ च्ल्युत्सर्गः सामान्यग्रहणार्थः ।

२ क्सविधाने चानिड्वचने च्लिसंप्रत्ययार्थः ।

३ घस्लभावे च ।

४ श्लेश्चित्करणं विशेषणार्थम् ।

५ इदित्करणं सामान्यग्रहणार्थम् ।

च्लेः सिच् ॥ ४४ ॥

१ सिचश्चित्करणानर्थक्यं स्थानिवत्त्वात् ।

२ अर्थवत्तु चित्करणसामर्थ्याध्दीट उदात्तत्वम् ।

३ तस्माच्चित्करणम् ।

४ इदित्करणं नकारलोपाभावार्थम् ।

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । कास्यनेकाच इति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । उच्छेराम्वक्तव्यः । ४ प. पुस्तके नास्ति । ५ प. पुस्तके इतः परमधिकम् निपातनाद्वा गुणत्वमिति भारद्वाजीयाः ।

५ न वा हन्तेः सिचः कित्करणं ज्ञापकं नकारलोपाभावस्य ।

६ इदित्त्वाद् वा स्थानिवत्त्वात् ।

७ स्पृशमृशकृषतृपदृपः सिज्वा[1] ।

शल इगुपधादनिटः क्सः ॥ ४५ ॥

१ क्सविधान इगुपधाभावश्च्लेर्गुणानिमित्तत्वात् ।

२ न वा क्सस्यानवकाशत्वादपवादो गुणस्य ।

३ अनिड्वचनमविशेषणं च्लेर्नित्यादिष्टत्वात् ।

४ न वा क्सस्य सिजपवादत्वात्तस्य चानिडाश्रयत्वादनिटि प्रसिद्धे क्सविधिः ।

५ शेषे सिज्विधानम् ।

श्लिष आलिङ्गने ॥ ४६ ॥

१ श्लिष आलिङ्गने नियमानुपपत्तिर्विधेयभावात् ।

२ सिद्धं तु श्लिष आलिङ्गनेऽचिण्विषये ।

३ अङ्विधाने च श्लिषोऽनालिङ्गने ।

४ योगविभागात्सिद्धम् ।

न दृशः ॥ ४७ ॥

णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ॥ ४८ ॥

१ णिश्रिद्रुस्रुषु कमेरुपसंख्यानम् ।

२ कर्मकर्तरि च ।

३ न वा कर्मण्यविधानात्कर्तृत्वाच्च कर्मकर्तुः सिद्धम् ।

विभाषा धेट्श्व्योः ॥ ४९ ॥

गुपेश्छन्दसि ॥ ५० ॥

नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः ५१

अस्यतिवक्तिख्यातिभ्योऽङ् ॥ ५२ ॥

१ अस्यतिग्रहणमात्मनेपदार्थम्[2] ।

२ कर्मकर्तरि च ।

लिपिसिचिह्वश्च ॥ ५३ ॥

आत्मनेपदेष्वन्यतरस्याम् ॥ ५४ ॥

पुषादिद्युताद्य्लृदितः परस्मैपदेषु ॥ ५५ ॥

सर्तिशास्त्यर्तिभ्यश्च ॥ ५६ ॥

इरितो वा ॥ ५७ ॥

जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ॥ ५८ ॥

कृमृदृरुहिभ्यश्छन्दसि ॥ ५९ ॥

चिण् ते पदः ॥ ६० ॥

दीपजनबुधपूरितायिप्यायिभ्यो ऽन्यतरस्याम् ॥ ६१ ॥

अचः कर्मकर्तरि ॥ ६२ ॥

दुहश्च ॥ ६३ ॥

न रुधः ॥ ६४ ॥

तपो ऽनुतापे च ॥ ६५ ॥

चिण् भावकर्मणोः ॥ ६६ ॥

सार्वधातुके यक् ॥ ६७ ॥

१ भावकर्मकर्तारः सार्वधातुकार्थाश्चेदेकद्विबहुषु नियमानुपपत्तिरतदर्थत्वात् ।

२ विकरणार्था इति चेत्कृताभिहिते विकरणाभावः ।

---

१ प पुस्तके इतः परमधिकम् । सिद्धं तु सिचो यादित्वात् । चङ्क्लेः प्रश्लिष्टनिर्देशात्सिद्धम् । चिणोऽङित्त्वात् ॥ २ प. पुस्तके इतः परमाधिकम् । पुषादित्वात् ।

३ भावकर्मणोर्यग्विधाने कर्मकर्तर्युपसंख्यानम् ।
४ विप्रतिषेधाद्धि शपो बलीयस्त्वम् ।
५ योगविभागात्सिद्धम् ।

कर्तरि शप् ॥ ६८ ॥

दिवादिभ्यः श्यन् ॥ ६९ ॥

वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ॥ ७० ॥

यसो ऽनुपसर्गात् ॥ ७१ ॥

संयसश्च ॥ ७२ ॥

स्वादिभ्यः श्नुः ॥ ७३ ॥

श्रुवः शृ च ॥ ७४ ॥

अक्षो ऽन्यतरस्याम् ॥ ७५ ॥

तनूकरणे तक्षः ॥ ७६ ॥

तुदादिभ्यः शः ॥ ७७ ॥

रुधादिभ्यः श्नम् ॥ ७८ ॥

१ श्नमि शित्करणं ङ्यादिह्रस्वार्थम् ।
२ न वा धात्वन्यत्वात् ।
३ बहुलं पित्सार्वधातुकं छन्दसि ।

तनादिकृञ्भ्य उः ॥ ७९ ॥

धिन्विकृण्व्योर च ॥ ८० ॥

क्र्यादिभ्यः श्ना ॥ ८१ ॥

स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च ॥ ८२ ॥

हलः श्नः शानज्झौ ॥ ८३ ॥

१ श्नाविकारस्य शित्करणानर्थक्यं स्थानिवत्त्वात् ।
२ अर्थवत्तु ज्ञापकं सार्वधातुकादेशेऽनुबन्धास्थानिवत्त्वस्य ।
३ प्रयोजनं हितातङोरपित्त्वम् ।
४ तबादिषु चाङित्त्वम् ।
५ तस्य दोषो मिप आदेशे पिद्भावः ।
६ विदेर्वसोः शित्त्वम् ।
७ कित्करणाद्वा सिद्धम् ।

छन्दसि शायजपि ॥ ८४ ॥

१ शायच्छन्दसि सर्वत्र ।

व्यत्ययो बहुलम् ॥ ८५ ॥

लिङ्याशिष्यङ् ॥ ८६ ॥

१ आशिष्यङः प्रयोजनं स्थागागमिवचिविदयः[१] ।
२ दृशेरक् पितरं च दृशेयं मातरं च ।

कर्मवत्कर्मणा तुल्यक्रियः ॥ ८७ ॥

१ कर्मवदकर्मकस्य कर्ता ।
२ कर्म दृष्टश्चेत्समानधातौ ।
३ कर्मस्थभावकानां कर्मस्थक्रियाणां च ।
४ आत्मनेपदशवादिविधिप्रतिषेधः ।
५ कर्मकर्तरि कर्तृत्वं स्वातन्त्र्यस्य विवक्षितत्वात् ।
६ तत्र लान्तस्य कर्मवदनुदेशः ।
७ इतरथा हि कृत्यक्तखलर्थेषु प्रतिषेधः ।
८ सिद्धं तु प्राक्कृतकर्मत्वात् ।
९ आत्मसंयोगे कर्मकर्तुः कर्मदर्शनात् ।
१० पदलोपश्च ।
११ सकर्मकाणां प्रतिषेधोऽन्योऽन्यमाश्लिष्यत इति ।

१ प. पुस्तके इतः परमधिकम् । शकिरुहोश्चेति वक्तव्यम् ।

१२ तपेर्वा सकर्मकस्य वचनं नियमार्थम् ।
१३ तस्य च तपःकर्मकस्यैव ।
१४ दुहिपच्योर्बहुलं सकर्मकयोः ।
१५ सृजियुज्योः श्यंस्तु ।
१६ करणेन तुल्यक्रियः कर्ता बहुलम् ।
१७ स्रवत्यादीनां प्रतिषेधः ।
१८ भूषाकर्मकिरतिसनां चान्यत्रात्मनेपदात् ।

तपः तपःकर्मकस्यैव ॥ ८८ ॥

न दुहस्नुनमां यक्चिणौ ॥ ८९ ॥

१ यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञा-मुपसंख्यानम्[1] ।

कुषिरजोः प्राचां श्यन् परस्मैपदं च ।९०।

१ कुषिरजोः श्यन्विधाने सार्वधातुकवचनम्
२ अवचने हि लिङ्लिटोः प्रतिषेधः ।[2]

धातोः ॥ ९१ ॥

१ धात्वधिकारः प्राग्लादेशात् ।
२ लादेशे हि व्यवहितत्वादप्रसिद्धिः ।
३ प्रयोजनं प्रातिपदिकप्रतिषेधः ।
४ स्वपादिषु ।
५ अङ्गसंज्ञा च ।
६ कृत्संज्ञा च ।
७ उपपदसंज्ञा च ।
८ धातुग्रहणमनर्थकं यङ्विधौ धात्वधि-कारात् ।
९ अनधिकारे ह्यङ्गसंज्ञाभावः ।
१० हेतुमद्वचनं तु ज्ञापकमन्यत्राभावस्य ।
११ कण्ड्वादिषु च व्यपदेशिवद्वचनात्[3] ।

तत्रोपपदं सप्तमीस्थम् ॥ ९२ ॥

१ तत्रग्रहणं विषयार्थम् ।
२ उपपदसंज्ञायां समर्थवचनम् ।
३ निमित्तोपादानं च
४ अनुपादाने ह्यनुपपदे प्रत्ययप्रसङ्गः ।
५ निर्देशः संज्ञाकरणार्थः ।
६ तत्रवचनमुपपदसंनियोगार्थम् ।

कृदतिङ् ॥ ९३ ॥

वासरूपोऽस्त्रियाम् ॥ ९४ ॥

१ असरूपस्य वावचनमुत्सर्गस्य बाधक-विषयेऽनिवृत्त्यर्थम् ।
२ तत्रोत्सत्तिवाप्रसङ्गो यथा तद्धिते ।
३ सिद्धं त्वसरूपस्य बाधकस्य वावचनात् ।
४ अनुबन्धभिन्नेषु विभाषाप्रसङ्गः ।
५ सिद्धमनुबन्धस्यानेकान्तत्वात् ।
६ प्रयोगे चेल्लादेशेषु प्रतिषेधः ।
७ स्त्रियां प्रतिषेधे क्तल्युट्तुमुन्खलर्थेषु विभाषाप्रसङ्गः ।
८ स्त्रियाः प्रागिति चेत्क्त्वायां वावच-नम् ।
९ कालादिषु तुमुनि ।
१० अर्हे तृज्विधानम् ।

---

१ प. पुस्तके इतः परमधिकम् । यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुप-संख्यानमिति भारद्वाजपाठः । २ प. पुस्तके इतः परमधिकम् । आद्ये योगे न व्यवाये तिङः स्युः । न स्यादेत्वं टेष्टितां याद्विधत्ते । एशः शित्त्वम् । यच्च लोटो विधत्ते । यच्चाप्युक्तं लिङ्लिटोस्तच्च न स्यात् ॥ ३ प. पुस्तके सिद्धमधिकम् ।

कृत्याः ॥ ९५ ॥

१ कृत्यसंज्ञायां प्राङ्ण्वुल्वचनम्[1] ।

२ अर्हे कृत्यतृज्वचनं तु ज्ञापकं प्राङ्ण्वुल्वचनानर्थक्यस्य ।

तव्यत्तव्यानीयरः ॥ ९६ ॥

१ केलिमर उपसंख्यानम् ।

२ वसेस्तव्यत्कर्तरि णिच्च ।

३ तद्धितो वा ।

अचो यत् ॥ ९७ ॥

१ यति जनेरुपसंख्यानम् ।

२ हनो वा वध च ।

३ तद्धितो वा ।

पोरदुपधात् ॥ ९८ ॥

शकिसहोश्च ॥ ९९ ॥

गदमदचरयमश्चानुपसर्गे ॥ १०० ॥

१ अनुपसर्गाच्चरेराङि चागुरौ ।

अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु ॥ १०१ ॥

वह्यं करणम् ॥ १०२ ॥

अर्यः स्वामिवैश्ययोः ॥ १०३ ॥

१ स्वामिन्यन्तोदात्तत्वं च ।

उपसर्या काल्या प्रजने ॥ १०४ ॥

अजर्यं संगतम् ॥ १०५ ॥

१ अजर्यं कर्तरि ।

वदः सुपि क्यप् च ॥ १०६ ॥

१ वदः सुप्यनुपसर्गग्रहणम् ।

भुवो भावे ॥ १०७ ॥

हनस्त च ॥ १०८ ॥

१ हनस्तश्चित्स्त्रियां छन्दसि ।

एतिस्तुशास्वृदृजुषः क्यप् ॥ १०९ ॥

१ क्यब्विधौ वृञ्ग्रहणम् ।

२ [2]अञ्जेश्चोपसंख्यानं संज्ञायाम्[3] ।

ऋदुपधाच्चाक्लृपिचृतेः ॥ ११० ॥

ई च खनः ॥ १११ ॥

भृञो ऽसंज्ञायाम् ॥ ११२ ॥

१ भृञः संज्ञाप्रतिषेधे स्त्रियामप्रतिषेधोऽन्येन विहितत्वात् ।

२ प्रतिषेधः किमर्थं इति चेदस्त्रीसंज्ञाप्रतिषेधार्थः ।

३ सिद्धं तु स्त्रियां संज्ञाप्रतिषेधात्[4] ।

४ समश्च बहुलम् ।

मृजेर्विभाषा ॥ ११३ ॥

राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ॥ ११४ ॥

१ सूर्यरुच्याव्यथ्याः कर्तरि ।

२ कुप्यं संज्ञायाम् ।

३ कृष्टपच्यस्यान्तोदात्तत्वं च कर्मकर्तरि च ।

---

१ अत्र काशिकायां 'कृत्याः प्राङ्ण्वुलः' इति पाठः । परं स महाभाष्यासंमत इति न गृहीतः वै. पुस्तके तु काशिकावदुपलभ्यते । २ प. पुस्तके तकिशसिचतिजनि° इत्यधिकम् । ३ प. पुस्तके नास्ति । ४ प पुस्तके इतः परमधिकम् । शासिदुहिगुहिभ्यो वेति वक्तव्यमिति काशिका । ५ प. पुस्तके इतः परमधिकम् । संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिद्ध्यति । स्त्रियां भावाधिकारोऽस्ति तेन भार्या प्रसिध्यति । अथवा बहुलं कृत्याः संज्ञायामिति तत्स्मृतम् । यथा यत्यं यथा जन्यं यथा भित्तिस्तथैव सा ।

भिद्योद्ध्यौ नदे ॥ ११५ ॥
पुष्यसिध्यौ नक्षत्रे ॥ ११६ ॥
विपूयविनीयजित्या मुञ्जकल्कहलिषु ॥ ११७ ॥
प्रत्यपिभ्यां ग्रहेश्छन्दसि ॥ ११८ ॥
१ [1]प्रत्यपिभ्यां ग्रहेश्छन्दसि ।
पदास्वैरिबाह्यापक्ष्येषु च ॥ ११९ ॥
विभाषा कृवृषोः ॥ १२० ॥
युग्यं च पत्त्रे ॥ १२१ ॥
अमावस्यदन्यतरस्याम् ॥ १२२ ॥
छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयो-च्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवय-ज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ता-व्योपचाय्यपृडानि ॥ १२३ ॥
ऋहलोर्ण्यत् ॥ १२४ ॥
१ पाणौ सृजेर्ण्यद्विधिः ।
२ समवपूर्वाच्च ।
३ लपिदभिभ्यां च ।
ओरावश्यके ॥ १२५ ॥
१ आवश्यक उपपद इति चेद्द्योत्य उप-संख्यानम् ।
२ द्योत्य इति चेत्स्वरसमासानुपपत्तिः ।
३ ओरावश्यके ण्यतः स्तौतेः क्यप्पूर्वविप्रतिषिद्धम् ।
आसुयुवपिरपिलपित्रपिचमश्च ॥ १२६ ॥
आनाय्योऽनित्ये ॥ १२७ ॥
प्रणाय्योऽसंमतौ ॥ १२८ ॥
पाय्यसांनाय्यनिकाय्यधाय्या मानह-विर्निवाससामिधेनीषु ॥ १२९ ॥
१ पाय्यनिकाय्योरादिपत्वकत्वनिपातनम् ।
क्रतौ कुण्डपाय्यसंचाय्यौ ॥ १३० ॥
१ कुण्डपाय्ये यद्विधिः ।
अग्नौ परिचाय्योपचाय्यसमूह्याः ।१३१।
१ समूह्य इत्यनर्थकं वचनं सामान्येन कृतत्वात् ।
२ वह्यर्थमिति चेदूहेस्तदर्थत्वात्सिद्धम् ।
३ ऊहिविग्रहाच्च ब्राह्मणे सिद्धम् ।
चित्याग्निचित्ये च ॥ १३२ ॥
१ अग्निचित्या भावेऽन्तोदात्तः[3] ।
ण्वुल्तृचौ ॥ १३३ ॥
१ ण्वुलि सकर्मकग्रहणम् ।
२ न वा धातुमात्राद्दर्शनाण्ण्वुलः ।
३ तृजादिषु वर्तमानकालोपदानमध्यायक-वेदाध्यायाद्यर्थम् ।
४ न वा कालमात्रे दर्शनादन्येषाम् ।
नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।१३४
१ अजपि सर्वधातुभ्यः ।
२ पचाद्यनुक्रमणमनुबन्धासञ्जनार्थमपवा-दबाधनार्थं च ।
इगुपधज्ञाप्रीकिरः कः ॥ १३५ ॥
१ इगुपधेभ्य उपसर्गे कविधिर्मेघाद्यर्थः ।
२ न वा बुधादीनां दर्शनादनुपसर्गेऽपि ।
आतश्चोपसर्गे ॥ १३६ ॥
पाघ्राध्माधेट्दृशः शः ॥ १३७ ॥

१ प. पुस्तके इत्यधिकम् । हिरण्य इति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । दक्षिणाग्ना-विति वक्तव्यम् । ३ प. पुस्तके ' भावे ' इति नास्ति ।

१ जिघ्रः संज्ञायां प्रतिषेधः ।

अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च ॥ १३८ ॥

१ अनुपसर्गान्नौ लिम्पेः ।

२ गवि च विन्देः संज्ञायाम् ।

ददातिदधात्योर्विभाषा ॥ १३९ ॥

ज्वलितिकसन्तेभ्यो णः ॥ १४० ॥

१ तनोतेर्ण उपसंख्यानम् ।

श्याद्व्यधास्रुसंस्रुतीणवसावहृलिहश्लिषश्वसश्च ॥ १४१ ॥

दुन्योरनुपसर्गे ॥ १४२ ॥

विभाषा ग्रहः ॥ १४३ ॥

गेहे कः ॥ १४४ ॥

शिल्पिनि ष्वुन्[२] ॥ १४५ ॥

गस्थकन् ॥ १४६ ॥

ण्युट् च ॥ १४७ ॥

हश्च व्रीहिकालयोः ॥ १४८ ॥

प्रुसृल्वः समभिहारे वुन् ॥ १४९ ॥

१ प्रुसृल्वः साधुकारिणि वुन्विधानम् ।

आशिषि च ॥ १५० ॥

॥ इति तृतीयाध्यायस्य प्रथमः पादः ॥

कर्मण्यण्[२] ॥ १ ॥

१ कर्मणि निर्वर्त्यमानविक्रियमाणे चेद्वेदाध्यायादीनामुपसंख्यानम् ।

२ यत्र च नियुक्तः ।

३ ह्वग्रहिनीवहिभ्यश्च ।

४ अपरिगणनं वा ।

५ अनभिधानात् ।

६ अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेन

७ शीलिकामिभक्ष्याचरिभ्यो णः पूर्वपदप्रकृतिस्वरत्वं च ।

८ ईक्षिक्षमिभ्यां च[३] ।

९ अन्नदायेति च कृतां व्यत्ययश्छन्दसि ।

ह्वावामश्च ॥ २ ॥

आतोऽनुपसर्गे कः ॥३॥

१ कविधौ सर्वत्र प्रसारणिभ्यो डः ।

२ के हि संप्रसारणप्रसङ्गः ।

सुपि स्थः ॥ ४ ॥

१ सुपि स्थो भावे च ।

२ योगविभागात्सिद्धम् ।

तुन्दशोकयोः परिमृजापनुदोः ॥ ५ ॥

१ तुन्दशोकयोः परिमृजापनुदोरालस्यसुखाहरणयोः ।

२ कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् ।

प्रे दाज्ञः ॥ ६ ॥

समि ख्यः ॥ ७ ॥

गापोष्टक् ॥ ८ ॥

१ सुरासाध्वोः पिबतेः ।

२ बहुलं तणि ।

हरतेरनुद्यमनेऽच् ॥ ९ ॥

१ अच्प्रकरणे शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुःषु ग्रहेरुपसंख्यानम् ।

---

१ प. पुस्तके इतः परमधिकम् । नृतिखनिरञ्जिभ्य इति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । कर्माणि निर्वर्त्यमानविक्रियमाण इति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । न त्वम्भोऽभिगमा ।

२ सूत्रे च धार्यर्थे ।

वयसि च ॥ १० ॥

आङि ताच्छील्ये ॥ ११ ॥

अर्हः ॥ १२ ॥

स्तम्बकर्णयो रमिजपोः ॥ १३ ॥

१ स्तम्बकर्णयोर्हस्तिसूचकयोः ।

शमि धातोः संज्ञायाम् ॥ १४ ॥

१ शमि संज्ञायां धातुग्रहणं कृञो हेत्वादिषु टप्रतिषेधार्थम् ।

अधिकरणे शेतेः ॥ १५ ॥

१ अधिकरणे शेतेः पार्श्वादिषूपसंख्यानम् ।

२ दिग्धसहपूर्वाच्च ।

३ उत्तानादिषु कर्तृषु ।

४ गिरौ डश्छन्दसि ।

५ तद्धितो वा ।

चरेष्टः ॥ १६ ॥

१ चरेर्भिक्षाग्रहणं ज्ञापकं कर्मण्यप्रसङ्गस्य ।

भिक्षासेनादायेषु च ॥ १७ ॥

पुरोऽग्रतोऽग्रेषु सर्तेः ॥ १८ ॥

पूर्वे कर्तरि ॥ १९ ॥

कृञो हेतुताच्छील्यानुलोम्येषु ॥ २० ॥

दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुःषु ॥ २१ ॥

१ किंयत्तद्बहुषु कृञोऽज्विधानम् ।

कर्मणि भृतौ ॥ २२ ॥

न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु ॥ २३ ॥

स्तम्बशकृतोरिन् ॥ २४ ॥

१ स्तम्बशकृतोर्व्रीहिवत्सयोः ।

हरतेर्दृतिनाथयोः पशौ ॥ २५ ॥

फलेग्रहिरात्मंभरिश्च ॥ २६ ॥

१ भृञः कुक्ष्यात्मनोर्मुम्च ।

छन्दसि वनसनरक्षिमथाम् ॥ २७ ॥

एजेः खश् ॥ २८ ॥

१ खश्प्रकरणे वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्यः ।

नासिकास्तनयोर्ध्माधेटोः ॥ २९ ॥

१ स्तने धेटः ।

२ [१]मुष्टौ ध्मश्च ।

नाडीमुष्ट्योश्च ॥ ३० ॥

उदि कूले रुजिवहोः ॥ ३१ ॥

वहाभ्रे लिहः ॥ ३२ ॥

परिमाणे पचः ॥ ३३ ॥

मितनखे च ॥ ३४ ॥

विध्वरुषोस्तुदः ॥ ३५ ॥

असूर्यललाटयोर्दृशितपोः ॥ ३६ ॥

उग्रंपश्येरंमदपाणिंधमाश्च ॥ ३७ ॥

प्रियवशे वदः खच् ॥ ३८ ॥

१ खच्प्रकरणे गमेः सुप्युपसंख्यानम् ।

२ विहायसो विह च ।

३ खच्च डिद्वा ।

४ डे च[३] ।

---

१ प. पुस्तके इतः परमधिकम् । नासिकायां ध्मश्च धेटश्च । नासिकानाडीमुष्टिघटीखारीष्विति वक्तव्यम् । २ प. पुस्तके इदं नास्ति । ३ प. पुस्तके इतः परमधिकम् । भगे च दारेरिति काशिका ।

द्विषत्परयोस्तापेः ॥ ३९ ॥

वाचि यमो व्रते ॥ ४० ॥

पूःसर्वयोर्दारिसहोः ॥ ४१ ॥

सर्वकूलाभ्रकरीषेषु कषः ॥ ४२ ॥

मेघर्तिभयेषु कृञः ॥ ४३ ॥

क्षेमप्रियमद्रे ऽण् च ॥ ४४ ॥

आशिते भुवः करणभावयोः ॥ ४५ ॥

संज्ञायां भृतॄवृजिधारिसहितपिदमः ॥४६॥

गमश्च ॥ ४७ ॥

अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः ॥ ४८ ॥

१ डपकरणे सर्वत्रपन्नयोरुपसंख्यानम् ।

२ उरसो लोपश्च ।

३ सुदुरोरधिकरणे ।

४ निसो देशे[1] ।

आशिषि हनः ॥ ४९ ॥

१ दारावाहनोऽणन्त्यस्य च टः संज्ञायाम् ।

२ चारौ वा ।

३ कर्मणि समि च ।

अपे क्लेशतमसोः ॥ ५० ॥

कुमारशीर्षयोर्णिनिः ॥ ५१ ॥

लक्षणे जायापत्योष्टक् ॥ ५२ ॥

अमनुष्यकर्तृके च ॥ ५३ ॥

शक्तौ हस्तिकपाटयोः ॥ ५४ ॥

पाणिघताडघौ शिल्पिनि ॥ ५५ ॥

१ राजघ उपसंख्यानम् ।

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ॥ ५६ ॥

१ ख्युनि च्विप्रतिषेधानर्थक्यं ल्युट्ख्युनोरविशेषात् ।

२ मुमर्थमिति चेन्नाव्ययत्वात् ।

३ उत्तरार्थं तु ।

कर्तरि भुवः खिष्णुच्खुकञौ[2] ॥ ५७ ॥

स्पृशो ऽनुदके क्विन् ॥ ५८ ॥

ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ॥ ५९ ॥

१ धृषेर्द्विर्वचनमन्तोदात्तत्वं च ।

त्यदादिषु दृशो ऽनालोचने कञ् च ॥६०॥

१ दृशेः समानान्ययोश्चोपसंख्यानम्[3] ।

२ कृदर्थानुपपत्तिस्तु ।

३ इवार्थे तु तद्धितः ।

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गे ऽपि क्विप् ॥ ६१ ॥

१ सदादिषु सुब्ग्रहणम् ।

भजो ण्विः ॥ ६२ ॥

छन्दसि सहः ॥ ६३ ॥

वहश्च ॥ ६४ ॥

कव्यपुरीषपुरीष्येषु ञ्युट् ॥ ६५ ॥

हव्ये ऽनन्तःपादम् ॥ ६६ ॥

जनसनखनक्रमगमो विट् ॥ ६७ ॥

अदो ऽनन्ने ॥ ६८ ॥

क्रव्ये च ॥ ६९ ॥

---

१ प. पुस्तके इतः परमधिकम् । अन्येष्वपि दृश्यते । २ प. पुस्तके इतः परमधिकम् । इष्णुच इकारादित्वमुदात्तत्वात्कृतं भुवः । नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्णुचः । ३ प. पुस्तके इतः परमधिकम् दृशेः क्सो वक्तव्यः इति काशिका ।

१ अदोऽनन्ने क्रव्येग्रहणं वासरूपनिवृत्त्यर्थम् ।

दुहः कब्घश्च ॥ ७० ॥

मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ७१

१ श्वेतवहादीनां डस् ।

२ पदस्य च ।

३ वेर्थम् ।

अवे यजः ॥ ७२ ॥

[1]उपे छन्दसि ॥ ७३ ॥

आतो मनिन्क्वनिब्वनिपश्च ॥ ७४ ॥

अन्येभ्यो ऽपि दृश्यन्ते ॥ ७५ ॥

क्विप् च ॥ ७६ ॥

स्थः क च ॥ ७७ ॥

सुप्यजातौ णिनिस्ताच्छील्ये ॥ ७८ ॥

१ णिन्विधौ साधुकारिण्युपसंख्यानम् ।

२ ब्रह्मणि: वदः ।

कर्तर्युपमाने ॥ ७९ ॥

व्रते ॥ ८० ॥

बहुलमाभीक्ष्ण्ये ॥ ८१ ॥

मनः ॥ ८२ ॥

आत्ममाने खश्च ॥ ८३ ॥

१ कर्मकर्तरि च ।

भूते ॥ ८४ ॥

१ निष्ठायामितरेतराश्रयत्वादप्रसिद्धिः ।

२ अव्ययनिर्देशात्सिद्धम् ।

३ न वा तद्विधानस्यान्यत्राभावात् ।

४ भूताधिकारस्य प्रयोजनं कुमारघाती शीर्षघाती आखुहा विडालः सुत्वानः सुन्वन्तः सुषुपुषोऽनेहा अग्निमादधानस्य ।

करणे यजः ॥ ८५ ॥

कर्मणि हनः ॥ ८६ ॥

ब्रह्मभ्रूणवृत्रेषु क्विप् ॥ ८७ ॥

१ ब्रह्मादिषु हन्तेः क्विब्वचनं नियमार्थम् ।

२ तथा चोत्तरस्य वचनार्थः ।

बहुलं छन्दसि ॥ ८८ ॥

सुकर्मपापमन्त्रपुण्येषु कृञः ॥ ८९ ॥

सोमे सुञः ॥ ९० ॥

अग्नौ चेः ॥ ९१ ॥

कर्मण्यग्न्याख्यायाम् ॥ ९२ ॥

कर्मणीनिविक्रियः ॥ ९३ ॥

१ कर्मणि कुत्सिते ।

दृशेः क्वनिप् ॥ ९४ ॥

राजनि युधिकृञः ॥ ९५ ॥

सहे च ॥ ९६ ॥

सप्तम्यां जनेर्डः ॥ ९७ ॥

पञ्चम्यामजातौ ॥ ९८ ॥

उपसर्गे च संज्ञायाम् ॥ ९९ ॥

अनौ कर्मणि ॥ १०० ॥

अन्येष्वपि दृश्यते ॥ १०१ ॥

निष्ठा ॥ १०२ ॥

१ निष्ठायामितरेतराश्रयत्वादप्रसिद्धिः ।

२ द्विर्वा क्तक्तवतुग्रहणम् ।

३ आदिकर्मणि निष्ठा ।

४ यद्वा भवन्त्यर्थे ।

५ न्याय्या त्वाद्यपवर्गात् ।

६ वा चाद्यतन्याम् ।

१ प. पुस्तके इतः परमधिकम् । अन्येभ्योऽपि दृश्यते ।

सुयजोर्ङ्वनिप् ॥ १०३ ॥

जीर्यतेरतृन् ॥ १०४ ॥

छन्दसि लिट् ॥ १०५ ॥

लिटः कानज्वा ॥ १०६ ॥

क्वसुश्च ॥ १०७ ॥

१ कानच्क्वसोर्वावचनं छन्दसि तिङो दर्शनात् ।

२ न वानेन विहितस्यादेशवचनात् ।

३ कित्करणं संयोगान्तार्थम् ।

४ ऋकारान्तगुणप्रतिषेधार्थं वा ।

भाषायां सदवसश्रुवः ॥ १०८ ॥

१ भाषायां सदादिभ्यो वा लिट् ।

२ तद्विषये लुङोऽनिवृत्त्यर्थम् ।

३ अनद्यतनपरोक्षयोश्च ।

४ अपवादविप्रतिषेधाद्धि तयोर्भावः ।

५ तस्य क्वसुरपरोक्षे नित्यम् ।

उपेयिवाननाश्वाननूचानश्च[1] ॥ १०९ ॥

१ उपेयुषि निपातनमिडर्थमिति चेदजादावतिप्रसङ्गः ।

२ एकादिष्टस्येड्भावार्थं तु ।

३ व्यञ्जने यणादेशार्थं वा ।

४ अनूचानः कर्तरि ।

लुङ् ॥ ११० ॥

१ लुङ्लृटोरपवादप्रसङ्गो भूतभविष्यतोरविशेषवचनात् ।

२ न वापवादस्य निमित्ताभावादनद्यतने हि तयोर्विधानम् ।

३ वसेर्लुङ् रात्रिशेषे ।

४ जागरणसंततौ ।

अनद्यतने लङ् ॥ १११ ॥

१ अनद्यतन इति बहुव्रीहिनिर्देशोऽद्य ह्योऽभुक्ष्महीति ।

२ परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये ।

अभिज्ञावचने लृट् ॥ ११२ ॥

न यदि ॥ ११३ ॥

विभाषा साकाङ्क्षे ॥ ११४ ॥

१ विभाषा साकाङ्क्षे सर्वत्र ।

परोक्षे[3] लिट् ॥ ११५ ॥

१ परोक्षे लिडत्यन्तापह्नवे च ।

हशश्वतोर्लङ् च ॥ ११६ ॥

प्रश्ने चासन्नकाले ॥ ११७ ॥

लट् स्मे ॥ ११८ ॥

१ स्मपुरा भूतमात्रे न स्मपुराद्यतने ।

अपरोऽक्षे च ॥ ११९ ॥

ननौ पृष्टप्रतिवचने ॥ १२० ॥

१ ननौ पृष्टप्रतिवचन इत्यशिष्यं क्रियासमासेर्विवक्षितत्वात् ।

नन्वोर्विभाषा ॥ १२१ ॥

पुरि लुङ् चास्मे ॥ १२२ ॥

---

१ प. पुस्तके इतः परमधिकम् । उपेयुषि निपातमिडर्थम् । २ प. पुस्तके इतः परमधिकम् । नोपेयिवान्निपात्यो द्विर्वचनादिडभविष्यति परत्वात् । अन्येषामेकाचां द्विर्वचनं नित्यमित्याहुः अस्य पुनरिट् च नित्यो द्विर्वचनं च न विहन्यते ह्यस्य । द्विर्वचने चैकाच्त्वात् । तस्मादिड् बाधते द्वित्वम् । ३ प. पुस्तके इतः परमधिकम् । परोभवः परस्याक्षे परोक्षे लिटि दृश्यताम् । उत्वं वादेः परादक्ष्णः सिद्धं वास्मान्निपातनात् ।

१ हशश्वद्भ्यां पुरा ।
२ स्मः सर्वेभ्यो विप्रतिषेधेन ।

वर्तमाने लट् ॥ १२३ ॥

१ प्रवृत्तस्याविरामे शिष्या भवन्त्यवर्तमानत्वात् ।
२ नित्यप्रवृत्ते च कालाविभागात् ।
३ न्याय्या त्वारम्भानपवर्गात् ।
४ अस्ति च मुक्तसंशये विरामः ।
५ सन्ति च कालविभागाः ।

लटः शतृशानचावप्रथमासमानाधिकरणे ॥ १२४ ॥

१ लस्याप्रथमासमानाधिकरणेनायोगादादेशानुपपत्तिर्यथान्यत्र ।
२ योग इति चेदन्यत्रापि योगः स्यात् ।
३ लटः शतृशानचावप्रथमासमानाधिकरण इति चेत्प्रत्ययोत्तरपदयोरुपसंख्यानम् ।
४ प्रथमाप्रतिषेध उत्तरपद आदेशानुपपत्तिः।
५ सिद्धं तु प्रत्ययोत्तरपदयोश्चेति वचनात् ।
६ तत्र प्रत्ययस्यादेशनिमित्तत्वादप्रसिद्धिः ।
१ प. पुस्तके इतः परमधिकम् । सुपां च सुपो भवन्तीति वाच्यम् । तिङां च तिङो भवन्तीति वाच्यम् । २ प. पुस्तके इतः परमधिकम् । आङ्याजयारां चोपसंख्यानम् । ३ प. पुस्तके इतः परमधिकम् । अमो मश्च मकारस्य । वचनादन्यबाधनम् । द्विमकार ईडपृक्ते यकारादौ न दुष्यति । ४ प. पुस्तके इतः परमधिकम् । सर्वप्रातिपदिकेभ्यो लालसायामिति वक्तव्यं दध्यस्यति मध्वस्यतीत्येवमर्थम् । सुग्वक्तव्यो दधिस्यति मधुस्यतीत्येवमर्थम् ।

१ नुम्विधावुपदेशिवद्वचनं प्रत्ययविध्यर्थम् ।

२ इतरथा ह्यनकारे प्रत्ययः ।

३ तत्रायथेष्टप्रसङ्गः ।

४ धातुग्रहणसामर्थ्याद्वा तदुपदेशे नुम्विधानम् ।

शे मुचादीनाम् ॥ ५९ ॥

१ शे तृम्पादीनाम् ।

२ लुप्तनकारत्वात् ।

मस्जिनशोर्झलि ॥ ६० ॥

रधिजभोरचि ॥ ६१ ॥

नेट्यलिटि रधेः ॥ ६२ ॥

रभेरशब्लिटोः ॥ ६३ ॥

लभेश्च ॥ ६४ ॥

आङो यि ॥ ६५ ॥

उपात्प्रशंसायाम् ॥ ६६ ॥

उपसर्गात्खल्घञोः ॥ ६७॥

न सुदुर्भ्यां केवलाभ्याम् ॥ ६८ ॥

१ सुदुरोः केवलग्रहणमन्योपसर्गप्रतिषेधार्थम् ।

विभाषा चिण्णमुलोः ॥ ६९ ॥

१ चिण्णमुलोरनुपसर्गस्य ।

उगिदचां सर्वनामस्थानेऽधातोः ॥७०॥

१ उगित्यञ्चतिग्रहणात्सिद्धमधातोः ।

युजेरसमासे ॥ ७१ ॥

नपुंसकस्य झलचः ॥ ७२ ॥

१ झलचो नुम्विधावुगित्प्रतिषेधः ।

२ विप्रतिषेधात्सिद्धम् ।

३ पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यम् ।

४ तत्र बहूर्जि प्रतिषेधः ।

५ अन्त्यात्पूर्वं नुममेके ।

इकोऽचि विभक्तौ[१] ॥ ७३ ॥

१ इकोऽचि विभक्तावज्ग्रहणं नुम्नुटोर्विप्रतिषेधार्थम् ।

२ इतरथा हि नुमो नित्यनिमित्तत्वान्नुडभावः ।

३ उत्तरार्थं च ।

तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥ ७४ ॥

१ पुंवदिति नुम्प्रतिषेधश्चेद्गुणनाभावनुडौत्वप्रतिषेधः ।

२ ह्रस्वाभावार्थं च ।

३ अर्थातिदेशात्सिद्धम् ।

४ तद्धितलुक्प्रतिषेधश्च ।

५ न वा समानायामाकृतौ भाषितपुंस्कविज्ञानात् ।

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ।७५।

छन्दस्यपि दृश्यते ॥ ७६ ॥

ई च द्विवचने ॥ ७७ ॥

नाभ्यस्ताच्छतुः ॥ ७८ ॥

वा नपुंसकस्य ॥ ७९ ॥

आच्छीनद्योर्नुम् ॥ ८० ॥

शप्श्यनोर्नित्यम् ॥ ८१ ॥

सावनडुहः ॥ ८२ ॥

---

१ प. पुस्तके इतः परमधिकम् । इकोऽचि व्यञ्जने मा भूत् । अस्तुलोपः । स्वरः कथनम् । स्वरो पे श्रूयमाणेऽपि । लुप्ते किं न भविष्यति ।

१ अनडुहः सावाम्प्रतिषेधो नुमोऽनवकाशत्वात्।

२ न वावर्णोपधस्य नुम्वचनात्।

३ पुनःप्रसङ्गविज्ञानाद्वा सिद्धम्।

४ यथात्त्वादिषु द्विर्वचनम्।

दृक्स्ववःस्वतवसां छन्दसि ॥ ८३ ॥

दिव औत् ॥ ८४ ॥

१ दिव औत्त्वे धातुप्रतिषेधः[1]।

२ अधात्वधिकारात्सिद्धमिति चेन्नपुंसके दोषः।

३ उक्तं[2] वा।

पथिमथ्यृभुक्षामात् ॥ ८५ ॥

इतोऽत् सर्वनामस्थाने ॥ ८६ ॥

१ इतोऽद्वचनम[3]नर्थकमाकारप्रकरणात्।

२ षपूर्वार्थं तु।

थो न्थः ॥ ८७ ॥

भस्य टेर्लोपः ८८ ॥

पुंसोऽसुङ् ॥ ८९ ॥

१ असुङ्युपदेशिवद्वचनं स्वरसिद्ध्यर्थं बहिरङ्गलक्षणत्वात्।

गोतो णित् ॥ ९० ॥

१ गोतः सर्वनामस्थाने णित्कार्यातिदेशः।

२ सर्वनामस्थाने णित्त्ववचने ह्यसंप्रत्ययः षष्ठ्यनिर्देशात्।

३ तपरकरणमनर्थकं स्थानिवत्प्रतिषेधात्।

४ इतरथा हि संबुद्धिजसोः प्रतिषेधः।

णलुत्तमो वा ॥ ९१ ॥

सख्युरसंबुद्धौ ॥ ९२ ॥

अनङ् सौ ॥ ९३ ॥

ऋदुशनस्पुरुदंशोऽनेहसां च ॥ ९४ ॥

तृज्वत् क्रोष्टुः ॥ ९५ ॥

स्त्रियां च[4] ॥ ९६ ॥

१ तृज्वदिति शास्त्रातिदेशश्चेद्यथा चिणि तद्वत्।

२ तत्र रपरवचनम्।

३ रूपातिदेश इति चेत्सर्वादेशप्रसङ्गः।

४ सिद्धं तु रूपातिदेशात्।

५ सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात्।

६ आन्तरतम्याच्च सिद्धम्।

७ तृज्वद्वचनमनर्थकं तृज्विषये तृचो मृगवाचित्वात्।

८ तुनो निवृत्त्यर्थमिति चेत्सिद्धं यथान्यत्रापि।

९ वावचनानर्थक्यं च स्वभावसिद्धत्वात्।

१० गुणवृद्ध्यौत्त्वतृज्वद्भावेभ्यो नुम्पूर्वविप्रतिषिद्धम्।

११ नुमचिरतृज्वद्भावेभ्यो नुट्।

१२ न वा नुड्विषये रप्रतिषेधात्।

१३ इतरथा हि सर्वापवादः।

१४ तस्मान्नुड्विषये रप्रतिषेधः।

विभाषा तृतीयादिष्वचि ॥ ९७ ॥

---

१ प. पुस्तके इतः परमधिकम्। अधात्वधिकारात्सिद्धम्। २ प. पुस्तके नास्ति। ३ प. पुस्तके 'मनर्थक' इति नास्ति। ४ प. पुस्तके इतः परमधिकम्। तृज्वत्स्त्रियां विभक्तौ चेत्क्रोष्ट्रीभक्तिर्न सिध्यति। ईकारे तन्निमित्तः सः गौरादिषु न पठ्यते। तेनैव भावनं चेत्स्यादनिष्टोऽपि प्रसज्यते।

चतुरनडुहोरामुदात्तः ॥ ९८ ॥

१ आमनडुहः स्त्रियां वा ।

अम् संबुद्धौ ॥ ९९ ॥

ॠत इद्धातोः ॥ १०० ॥

उपधायाश्च ॥ १०१ ॥

उदोष्ठ्यपूर्वस्य ॥ १०२ ॥

बहुलं छन्दसि ॥ १०३ ॥

॥ इति सप्तमाध्यायस्य प्रथमः पादः ॥

सिचि वृद्धिः परस्मैपदेषु ॥ १ ॥

१ सिचि वृद्धावोकारप्रतिषेधः[१] ।

२ ओकाराद्वृद्धिर्विप्रतिषेधेनेति चेदोत्वाभावः ।

३ पुनः प्रसङ्गविज्ञानाद्वा सिद्धं यथा प्रसारणादिषु द्विर्वचनम् ।

४ सौढामित्रौ बहिरङ्गलक्षणत्वात्सिद्धम् ।

अतो र्लान्तस्य ॥ २ ॥

वदव्रजहलन्तस्याचः ॥ ३ ॥

१ हल्ग्रहणमिटि प्रतिषेधार्थम् ।

२ नवानन्तरप्रतिषेधात् ।

३ तच्चानन्त्यार्थम् ।

४ अन्त्यस्य वचनानर्थक्यात् ।

५ अतो विभाषार्थमिति चेत्सिद्धं वृद्धेर्लोपबलीयस्त्वात्[३] ।

नेटि ॥ ४ ॥

ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥ ५ ॥

ऊर्णोतेर्विभाषा ॥ ६ ॥

अतो हलादेर्लघोः ॥ ७ ॥

नेड्वशि कृति ॥ ८ ॥

१ नेड्वृमनादौ कृति ।

तितुत्रतथसिसुसरकसेषु च ॥ ९ ॥

१ तितुत्रेष्वग्रहादीनाम् ।

एकाच उपदेशेऽनुदात्तात् ॥ १० ॥

१ एकाज्ग्रहणं जागर्त्यर्थम् ।

२ वध इट्प्रतिषेधः संनिपात एकाच्त्वात्प्रकृतेश्चानुदात्तत्वात् ।

३ एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्क्र्यादिभ्यो लिटि नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य ।

४ तत्र पचादिभ्य इड्वचनम् ।

५ सनश्चेट्प्रतिषेधः ।

६ उभयविशेषणत्वात्सिद्धम् ।

७ यङ्लोपे च तदन्तद्विर्वचनात् ।

श्र्युकः किति ॥ ११ ॥

सनि ग्रहगुहोश्च ॥ १२ ॥

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥ १३ ॥

१ कृञोऽसुटः ।

श्वीदितो निष्ठायाम् ॥ १४ ॥

१ श्विग्रहणमिदन्तत्वादुपदेशस्य ।

---

१ प पुस्तके इतः परमधिकम् । इत्त्वोत्त्वाभ्यां गुणवृद्धी विप्रतिषेधेन । २ प. पुस्तके इतः परमधिकम् । ओकाराद्वृद्धिर्विप्रतिषेधेन । ३ प. पुस्तके इतः परमधिकम् । एकाचस्तौ बलीनि वा ।

यस्य विभाषा ॥ १५ ॥

१ यस्य विभाषाविदेः ।

आदितश्च ॥ १६ ॥

विभाषा भावादिकर्मणोः ॥ १७ ॥

क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ॥ १८ ॥

१ क्षुब्धं मन्थाभिधाने ।

२ स्वान्तं मनोऽभिधाने ।

३ ध्वान्तं तमोऽभिधाने ।

धृषिशसी वैयात्ये ॥ १९ ॥

दृढः स्थूलबलयोः २० ॥

१ दृढनिपातनं नकारहकारलोपार्थं परस्य च ढत्वार्थम् ।

२ अनिड्वचने हि रभावाप्रसिद्धिरलघुत्वात् ।

३ नलोपवचनं च ।

प्रभौ परिवृढः ॥ २१ ॥

१ परिवृढनिपातनं च ।

कृच्छ्रगहनयोः कषः ॥ २२ ॥

घुषिरविशब्दने ॥ २३ ॥

अर्देः संनिविभ्यः ॥ २४ ॥

अभेश्चाविदूर्ये ॥ २५ ॥

णेरध्ययने वृत्तम् ॥ २६ ॥

१ वृत्तनिपातने णिग्रहणमण्यन्तस्यावधारणप्रतिषेधार्थम् ।

२ निपातनं णिलोपेड्गुणप्रतिषेधार्थम् ।

वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ॥ २७ ॥

१ दान्तशान्तयोरुपधादीर्घत्वं च ।

२ स्पष्टच्छन्नयोरुपधाह्रस्वत्वं च ।

रुष्यमत्वरसंघुषास्वनाम् ॥ २८ ॥

१ घुषिस्वनोर्वावचनमिट्प्रतिषेधाद्विप्रतिषेधेन ।

हृषेर्लोमसु ॥ २९ ॥

अपचितश्च ॥ ३० ॥

हु ह्वरेश्छन्दसि ॥ ३१ ॥

अपरिह्वृताश्च ॥ ३२ ॥

सोमे ह्वरितः ॥ ३३ ॥

ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलिति क्षरिति क्षमिति वमित्यमितीति च ॥ ३४ ॥

आर्धधातुकस्येड्वलादेः ॥ ३५ ॥

स्नुक्रमोरनात्मनेपदनिमित्ते ॥ ३६ ॥

१ स्नुक्रमोरनात्मनेपदनिमित्ते चेत्कृत्युपसंख्यानम् ।

२ आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधः ।

३ सिद्धं तु स्नोरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् ।

४ क्रमेश्च ।

५ कर्तरि चात्मनेपदविषयात्कृति ।

ग्रहोऽलिटि दीर्घः ॥ ३७ ॥

१ ग्रहेर्दीर्घत्व इड्ग्रहणम् ।

२ अग्रहणे ह्यसंप्रत्ययः षष्ठ्यभावात् ।

---

१ प. पुस्तके इतः परमाधिकम् । हृषेर्लोमकेशकर्तृकस्येति वक्तव्यम् । विस्मितप्रतीघातयोरिति वक्तव्यम् । क्विनि नित्यमिति वक्तव्यम् ।

३ चिण्वदिटः प्रतिषेधः ।

४ यङ्लोपे च ।

५ इड्दीर्घ इति चेद्विप्रतिषिद्धम् ।

६ प्रतिषिद्धस्य च पुनर्विधाने दीर्घत्वाभावः।

७ यङ्लोपे चोक्तम् ।

वृतो वा ॥ ३८ ॥

न लिङि ॥ ३९ ॥

सिचि च परस्मैपदेषु ॥ ४० ॥

इट् सनि वा ॥ ४१ ॥

लिङ्सिचोरात्मनेपदेषु ॥ ४२ ॥

ऋतश्च संयोगादेः ॥ ४३ ॥

स्वरतिसूतिसूयतिधूञूदितो वा ॥ ४४ ॥

१ पुनर्वावचनं लिङ्सिचोर्निवृत्यर्थम् ।

२ स्वरतिरुदात्तः ।

३ वावचनं निवृत्त्यर्थम् ।

४ अनुदात्ते हि किति वाप्रसङ्गः प्रतिषिध्य पुनर्विधानात् ।

रधादिभ्यश्च ॥ ४५ ॥

निरः कुषः ॥ ४६ ॥

इण्निष्ठायाम् ॥ ४७ ॥

१ इड्ग्रहणं नित्यार्थम् ।

तीषसहलुभरुषरिषः॥ ४८ ॥

१ इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः ।

सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ॥ ४९ ॥

क्लिशः क्त्वानिष्ठयोः ॥ ५० ॥

पूङश्च ॥ ५१ ॥

वसतिक्षुधोरिट् ॥ ५२ ॥

१ पुनरिड्ग्रहणं नित्यार्थम् ।

अञ्चेः पूजायाम् ॥ ५३ ॥

लुभो विमोहने ॥ ५४ ॥

जॄव्रश्च्योः क्त्वि ॥ ५५ ॥

उदितो वा ॥ ५६ ॥

सेऽसिचि कृतचृतच्छृदतृदनृतः ॥ ५७ ॥

गमेरिट् परस्मैपदेषु ॥ ५८ ॥

१ गमेरिट्परस्मैपदेषु चेत्कृत्युपसंख्यानम् ।[1]

२ आत्मनेपदपरप्रतिषेध उक्तम् ।[2]

३ सिद्धं तु गमेरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् ।

न वृद्भ्यश्चतुर्भ्यः ॥ ५९ ॥

१ वृतादिप्रतिषेधे च[3] ।

२ आत्मनेपदपर इड्वचने तत्परपरसीयुडेकादेशेष्विड्वचनम् ।

३ सिद्धं तु वृतादीनामात्मनेपदेन समानपदस्थस्येड्वचनात् ।

४ चतुस्तासिक्लृपिग्रहणानर्थक्यं च ।

५ निवृत्तत्वात्सकारस्य ।

तासि च क्लृपः ॥ ६० ॥

अचस्तास्वत् थल्यनिटो नित्यम् ॥ ६१ ॥

उपदेशेऽत्वतः ॥ ६२ ॥

१ तासावत्वत्प्रतिषेधे घसेः प्रतिषेधप्रसङ्गोऽकारवत्त्वात् ।

२ सिद्धं तु हलादिग्रहणात् ।

३ तस्य चाभावात्तासौ ।

१–२ प. पुस्तके नास्ति । ३ प. पुस्तके कृत्युपसंख्यानम् इत्यधिकम् ।

ऋतो भारद्वाजस्य ॥ ६३ ॥

१ ऋतो भारद्वाजस्येति नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य ।

२ तत्र पचादिभ्य इड्वचनम् ।

३ योगविभागात्सिद्धम् ।

बभूथाततन्थजगृभ्मववर्थेति निगमे ॥ ६४ ॥

विभाषा सृजिदृशोः ॥ ६५ ॥

इडत्त्यर्तिव्ययतीनाम् ॥ ६६ ॥

वस्वेकाजाद्घसाम् ॥ ६७ ॥

१ वस्वेकाजाद्घसांवचनं नियमार्थम् ।

२ घसिग्रहणमनच्कत्वात् ।

विभाषा गमहनविदविशाम् ॥ ६८ ॥

सनिं ससनिवांसम् ॥ ६९ ॥

ऋद्धनोः स्ये ॥ ७० ॥

१ स्वरतेर्वेट्त्वादृतः स्ये विप्रतिषेधेन ।

अञ्जेः सिचि ॥ ७१ ॥

स्तुसुधूञ्भ्यः परस्मैपदेषु ॥ ७२ ॥

यमरमनमातां सक् च ॥ ७३ ॥

स्मिपूङ्रञ्ज्वशां सनि ॥ ७४ ॥

किरश्च पञ्चभ्यः ॥ ७५ ॥

रुदादिभ्यः सार्वधातुके ॥ ७६ ॥

ईशः से ॥ ७७ ॥

ईडजनोर्ध्वे च ॥ ७८ ॥

लिङः सलोपोऽनन्त्यस्य ॥ ७९ ॥

अतो येयः ॥ ८० ॥

आतो ङितः ॥ ८१ ॥

आने मुक् ॥ ८२ ॥

१ मुकि स्वरे दोषः ।

२ अभक्ते च ।

३ परादौ दीर्घप्रसङ्गः ।

ईदासः ॥ ८३ ॥

अष्टन आ विभक्तौ ॥ ८४ ॥

१ अष्टन्जनादिपथिमथ्यात्त्वेष्वान्तरतम्यादनुनासिकप्रसङ्गः ।

२ सिद्धमनण्त्वात् ।

३ उच्चारणसामर्थ्याद्वा ।

रायो हलि ॥ ८५ ॥

युष्मदस्मदोरनादेशे ॥ ८६ ॥

द्वितीयायां च ॥ ८७ ॥

प्रथमायाश्च द्विवचने भाषायाम् ॥ ८८ ॥

योऽचि ॥ ८९ ॥

शेषे लोपः ॥ ९० ॥

मपर्यन्तस्य ॥ ९१

युवावौ द्विवचने ॥ ९२ ॥

यूयवयौ जसि ॥ ९३ ॥

त्वाहौ सौ ॥ ९४ ॥

तुभ्यमह्यौ ङयि ९५ ॥

तवममौ ङसि ॥ ९६ ॥

त्वमावेकवचने ॥ ९७ ॥

प्रत्ययोत्तरपदयोश्च ॥ ९८ ॥

१ त्रिचतुर्युष्मदस्मद्ग्रहणेष्वर्थग्रहणं शब्दविशेषणम् ।

त्रिचतुरोः स्त्रियां तिसृचतसृ ॥ ९९ ॥

१ तिसृभावे संज्ञायां कन्युपसंख्यानम् ।

२ चतसर्याद्युदात्तनिपातनं च ।

१ प. पु इतः परमसिद्धम् । [illegible] । २ प. पुस्तके °विशेषणत्वात् ।

३ उपदेशिवद्वचनं च ।

४ स्वरसिद्ध्यर्थम् ।

५ उक्तं वा।[1]

अचि र ऋतः ॥ १०० ॥

१ अचि रादेशे जस्युपसंख्यानं गुणपरत्वात् ।

२ न वानवकाशत्वाद्रस्य ।[2]

जराया जरसन्यतरस्याम् ॥ १०१ ॥

त्यदादीनामः १०२ ॥

१ त्यदादीनां द्विपर्यन्तानामकारवचनम् ।[3]

किमः कः १०३ ॥

कु तिहोः ॥ १०४ ॥

क्वाति ॥ १०५ ॥

तदोः सः सावनन्त्ययोः ॥ १०६ ॥

अदस औ सुलोपश्च[3] ॥ १०७ ॥

१ सावौत्त्वप्रतिषेधः साकच्काद्वा सादुत्वं च ।

२ उत्तरपदभूतानामादेश उपदेशिवद्वचनम् ।

३ अनादिष्टार्थम् ।

४ बहिरङ्गलक्षणत्वात् ।

इदमो मः ॥ १०८ ॥

दश्च ॥ १०९ ॥

यः सौ ॥ ११० ॥

इदो ऽय् पुंसि ॥ १११ ॥

अनाप्यकः ॥ ११२ ॥

हलि लोपः ॥ ११३ ॥

मृजेर्वृद्धिः ॥ ११४ ॥

१ मृजेर्वृद्धिविधौ क्ङिप्रतिषेधः ।

२ धातोः स्वरूपग्रहणे वा तत्प्रत्ययविज्ञानात्सिद्धम् ।

३ प्रयोजनं सृजिदृशिमस्जिनशिहन्तिगिरत्यर्थम् ।

अचो ञ्णिति ॥ ११५ ॥

१ वृद्धावज्ग्रहणं गोऽर्थम् ।

२ योगविभागः सखिव्यञ्जनाद्यर्थः

अत उपधायाः ॥ ११६ ॥

तद्धितेष्वचामादेः ॥ ११७ ॥

१ तद्धितेष्वचामादिवृद्धावन्त्योपधालक्षणप्रतिषेधः ।

२ लोकविज्ञानात् सिद्धम् ।

३ पुष्करसद्ग्रहणाद्वा ।

किति च[4] ॥ ११८ ॥

॥ इति सप्तमाध्यायस्य द्वितीयः पादः ॥

१–२ प. पुस्तके नास्ति । ३ प. पुस्तके इतः परमधिकम् । त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्मदोः शेषे लोपस्य लोपेन ज्ञायते प्राक्ततोऽदिति । अपि वोपसमस्तार्थमत्वाभावात्कृतं भवेत् । टिलोपद्वाबभावार्थः कर्तव्य इति तत्स्मृतम् । अथवा शेषसप्तम्या शेपेलोपो विधीयते । लुप्तशिष्टे हि तस्याहुः कार्यसिद्धिं मनीषिणः अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते । ह्रस्वाल्लुप्येत संबुद्धिः । न हलः । प्रकृतं हि तत् । आप एत्वं भवेत्तस्मिन् । न झलांत्यनुवर्तनात् । प्रत्ययस्थाच्च कादित्वम् । शीभावश्च प्रसज्यते । ४ वै. वा. नि. सिचि प्रभाविद् सन्यचस्तास्वदातो जराया अष्टादश ।

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥ १ ॥

१ देविकादिषु तदादिग्रहणम् ।

२ अन्यत्र तद्ग्रहणात्तदन्तग्रहणाद्वा ।

३ आद्यज्विशेषणत्वाद्वा सिद्धम् ।

४ आन्तरतम्यनिवर्तकत्वाद्वा ।

५ न्यग्रोधे च केवलग्रहणात् ।

६ वहीनरस्येद्वचनम् ।

केकयमित्रयुप्रलयानां यादेरियः ॥ २ ॥

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्[1] ॥ ३ ॥

१ ऐचोर्विषयार्थं प्रतिषेधसंनियुक्तवचनम्[2] ।

२ शौकलायावादेशेषु[3] चोक्तम् ।

द्वारादीनां च ॥ ४ ॥

न्यग्रोधस्य च केवलस्य ॥ ५ ॥

न कर्मव्यतिहारे ॥ ६ ॥

स्वागतादीनां च ॥ ७ ॥

श्वादेरिञि ॥ ८ ॥

१ प्रतिषेधे श्वादिग्रहणं ज्ञापकमन्यत्र श्वन्ग्रहणे तदादिग्रहणस्य [4]शौवहानाद्यर्थम् ।

२ इकारादिग्रहणं च श्वागणिकाद्यर्थम् ।

३ तदन्तस्य चान्यत्र प्रतिषेधः ।

पदान्तस्यान्यतरस्याम् ॥ ९ ॥

उत्तरपदस्य ॥ १० ॥

१ तद्धितेष्वचामादिवृद्धेरुत्तरपदवृद्धिर्विप्रतिषेधेन द्व्याशीतिकाद्यर्थम् ।

अवयवादृतोः ॥ ११ ॥

सुसर्वार्धाज्जनपदस्य ॥ १२ ॥

दिशोऽमद्राणाम् ॥ १३ ॥

प्राचां ग्रामनगराणाम् ॥ १४ ॥

संख्यायाः संवत्सरसंख्यस्य च ॥ १५ ॥

१ संवत्सरग्रहणमनर्थकं परिमाणान्तस्येति[5] कृतत्वात् ।

२ ज्ञापकं तु कालपरिमाणानां वृद्धिप्रतिषेधस्य ।

वर्षस्याभविष्यति ॥ १६ ॥

परिमाणान्तस्यासंज्ञाशाणयोः ॥ १७ ॥

जे प्रोष्ठपदानाम् ॥ १८ ॥

हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ॥ १९ ॥

अनुशतिकादीनां च ॥ २० ॥

देवताद्वन्द्वे च ॥ २१ ॥

नेन्द्रस्य परस्य ॥ २२ ॥

दीर्घाच्च वरुणस्य ॥ २३ ॥

प्राचां नगरान्ते ॥ २४ ॥

जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् ॥ २५ ॥

अर्धात्परिमाणस्य पूर्वस्य तु वा ॥ २६ ॥

नातः परस्य ॥ २७ ॥

प्रवाहणस्य ढे ॥ २८ ॥

---

१ प. पुस्तके इतः परमधिकम् । य्वाभ्यां परस्यावृद्धित्वम् । अपवादौ वृद्धेर्हि तौ । नित्यावैचा तयोर्वृद्धिः। किमर्थं नेति शिष्यते । २ प. पुस्तके इतः परमधिकम् । यत्र य्वाभ्यां परावृद्धिस्तत्राप्यग्र्येयथा न तौ । आचामादेर्य्वाभ्यां हि तौ । कथं द्व्याशीतिके न तौ । यत्र वृद्धिरचामादेस्तत्रैचावत्र य्वोर्हि सा । अथ कस्मात् पदान्ताभ्याम् । यथणो न भवेद्यणः । ३ प. पुस्तके नास्ति । ४ प. पुस्तके °हान्यर्थमिति पाठः । ५ प. पुस्तके परिमाणग्रहणस्य एतदधिकम् ।

तत्प्रत्ययस्य च ॥ २९ ॥

नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ॥ ३० ॥

यथातथयथापुरयोः पर्यायेण ॥ ३१ ॥

हनस्तोऽचिण्णलोः ॥ ३२ ॥

१ हन्तेस्तकारे तद्धिते प्रतिषेधः ।

२ उक्तं वा ।[1]

आतो युक् चिण्कृतोः ॥ ३३ ॥

नोदात्तोपदेशस्य मान्तस्यानाचमेः[2] ॥ ३४ ॥

जनिवध्योश्च ॥ ३५ ॥

अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ ॥ ३६ ॥

शाच्छासाह्वाव्यावेपां युक् ॥ ३७ ॥

१ णिच्प्रकरणे धूञ्प्रीञोर्नुग्वचनम् ।

२ पातेर्लुग्वचनम् ।

वो विधूनने जुक् ॥ ३८ ॥

लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने ॥ ३९ ॥

भियो हेतुभये षुक् ॥ ४० ॥

स्फायो वः ४१ ॥

शदेरगतौ तः ॥ ४२ ॥

रुहः पोऽन्यतरस्याम् ॥ ४३ ॥

प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः ॥ ४४ ॥

१ इत्त्वे कग्रहणं संघातग्रहणं चेदेतिकास्वमासिः ।

२ वर्णग्रहणं चेद्व्याहितत्वादप्रसिद्धिः ।

३ वचनप्रामाण्यादिति चेद्रथकट्यादिष्वतिप्रसङ्गः ।

४ ममकनरकयोरुपसंख्यानमप्रत्ययस्थत्वात् ।

५ त्यक्त्यपोश्च प्रतिषिद्धत्वात् ।

न यासयोः ॥ ४५ ॥

१ प्रतिषेधे त्यकन उपसंख्यानम् ।

२ पावकादीनां छन्दस्युपसंख्यानम् ।

३ आशिषि च ।

४ उत्तरपदलोपे च ।

५ क्षिपकादीनां च ।

६ तारका ज्योतिषि ।

७ वर्णका तान्तवे ।

८ वर्तका शकुनौ प्राचाम् ।

९ अष्टका पितृदैवत्ये ।

१० वा सूतकापुत्रकावृन्दारकाणाम् ।

उदीचामातः स्थाने यकपूर्वायाः ॥४६॥

१ यकपूर्वे[3] धात्वन्तप्रतिषेधः ।

भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ॥ ४७ ॥

१ भस्त्राग्रहणमुपसर्जनार्थम् ।

२ नञ्पूर्वग्रहणानर्थक्यं चोत्तरपदमात्रस्थेद्वचनात् ।

अभाषितपुंस्काच्च ॥ ४८ ॥

आदाचार्याणाम् ॥ ४९ ॥

ठस्येकः ॥ ५० ॥

१ ठादेशे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेधः ।

२ संघातग्रहणं चेदुणादिमाथितिकादीनां प्रतिषेधः ।

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । अवमिकमिचमीनामिति वक्तव्यम् । ३ प. पुस्तके °पर्वत्वे इति पाठः ।

३ तस्माद्विशिष्टग्रहणम् ।

इसुसुक्तान्तात् कः ॥ ५१ ॥

चजोः कु घिण्ण्यतोः ॥ ५२ ॥

न्यङ्क्वादीनां च ॥ ५३ ॥

हो हन्तेर्ञ्णिन्नेषु ॥ ५४ ॥

१ हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धिः ।

२ हकारस्येति चेञ्ञ्णित्यप्राप्तिः ।

३ स्थानिवद्भावाचाचो नकारेऽप्रसिद्धिः ।

४ वचनप्रामाण्यादिति चेदल्लोपे प्रतिषेधः ।

५ सिद्धं तूपधालोप इति वचनात् ।

अभ्यासाच्च ॥ ५५ ॥

१ अभ्यासात्कुत्वमसुपः ।

हेरचङि ॥ ५६ ॥

१ हेश्चङि प्रतिषेधानर्थक्यमङ्गान्यत्वात् ।

२ ज्ञापकं त्वन्यत्र ण्यधिकस्य कुत्वविज्ञानार्थम् ।

सन्लिटोर्जेः ॥ ५७ ॥

१ जिग्रहणे ज्यः प्रतिषेधः ।

विभाषा चेः ॥ ५८ ॥

न क्वादेः ॥ ५९ ॥

१ क्वाद्यजिव्रजियाचिरुचीनामप्रतिषेधो निष्ठायामनिटः कुत्ववचनात् ।

२ शुच्युब्ज्योर्घञि कुत्वम् ।

३ अर्चेः कविधानात्सिद्धम् ।

अजिव्रज्योश्च ॥ ६० ॥

भुजन्युब्जौ पाण्युपतापयोः ॥ ६१ ॥

१ भुजः पाणौ ।

२ न्युब्जेः कर्तृत्वादप्रतिषेधः ।

प्रयाजानुयाजौ यज्ञाङ्गे ॥ ६२ ॥

वञ्चेर्गतौ ॥ ६३ ॥

ओक उचः के ॥ ६४ ॥

ण्य आवश्यके ॥ ६५ ॥

यजयाचरुचप्रवचर्चश्च ॥ ६६ ॥

१ प्रवचिग्रहणमनर्थकं वचोऽशब्दसंज्ञाभावात् ।

२ उपसर्गपूर्वनियमार्थमिति चेदविवाक्यस्य विशेषवचनात्सिद्धम् ।

३ ण्यप्रतिषेधे त्यजेरुपसंख्यानम् ।

वचो ऽशब्दसंज्ञायाम् ॥ ६७ ॥

प्रयोज्यनियोज्यौ शक्यार्थे ॥ ६८ ॥

भोज्यं भक्ष्ये ॥ ६९ ॥

१ भोज्यमभ्यवहार्ये ।

घोर्लोपो लेटि वा ॥ ७० ॥

ओतः श्यनि ॥ ७१ ॥

१ ओतः शिति ।

२ उत्तरत्र शिद्ग्रहणाभावाय ।

क्सस्याचि ॥ ७२ ॥

लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ॥ ७३ ॥

शमामष्टानां दीर्घः श्यनि ॥ ७४ ॥

ष्ठिवुक्लमुचमां शिति ॥ ७५ ॥

१ दीर्घत्वमाङि चमः ।

क्रमः परस्मैपदेषु ॥ ७६ ॥

इषुगमियमां छः ॥ ७७ ॥

१ इषेश्छत्वमहालि ।

पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥ ७८ ॥

१ पिबेर्गुणप्रतिषेधः ।

२ अदन्त इति चेदुक्तम् ।

ज्ञाजनोर्जा ॥ ७९ ॥

प्वादीनां ह्रस्वः ॥ ८० ॥

मीनातेर्निगमे ॥ ८१ ॥

मिदेर्गुणः ॥ ८२ ॥

जुसि च ॥ ८३ ॥

१ जुसि गुणे यासुट्प्रतिषेधः ।

सार्वधातुकार्धधातुकयोः ॥ ८४ ॥

जाग्रो ऽविचिण्णल्ङित्सु ॥ ८५ ॥

१ चिण्णलोः प्रतिषेधसामर्थ्यादन्यत्र गुणभूतस्य वृद्धिप्रतिषेधः ।

२ प्रसज्यप्रतिषेधे जुसिगुणप्रतिषेधप्रसङ्गः ।

३ उत्तमे च णलि ।

४ न वानन्तरस्य प्रतिषेधात् ।

५ जुसि पूर्वेण गुणविधानम् ।

६ णलि च ।

७ अतोऽन्यत्र विधाने वावगुणत्वम् ।

८ न वा पर्युदाससामर्थ्यात् ।

९ वस्वर्थमिति चेन्न सार्वधातुकत्वात्सिद्धम् ।

पुगन्तलघूपधस्य च[२] ॥ ८६ ॥

नाभ्यस्तस्याचि पिति सार्वधातुके ॥ ८७ ॥

१ अभ्यस्तानामुपधाह्रस्वत्वमाचि पस्पशाते चाकशीमि वावशतीरिति दर्शनात् ।

२ बहुलं छन्दस्यानुषग्जुजोषदिति दर्शनात् ।

भूसुवोस्तिङि ॥ ८८ ॥

१ भूसुवोः प्रतिषेध एकाज्ग्रहणं बोभवीत्यर्थम् ।

उतो वृद्धिर्लुकि हलि ॥ ८९ ॥

ऊर्णोतेर्विभाषा ॥ ९० ॥

गुणो ऽपृक्ते ॥ ९१ ॥

तृणह इम् ॥ ९२ ॥

१ तृणह्ग्रहणं श्नमिमोर्व्यवस्थार्थम् ।

२ तृहिग्रहणे ह्रीम्विषये श्नमभावोऽनवकाशत्वात् ।

ब्रुव ईट् ॥ ९३ ॥

यङो वा ॥ ९४ ॥

तुरुस्तुशम्यमः सार्वधातुके ॥ ९५ ॥

१ पुनः सार्वधातुकग्रहणमपिदर्थम् ।

अस्तिसिचो ऽपृक्ते ॥ ९६ ॥

बहुलं छन्दसि ॥ ९७ ॥

रुदश्च पञ्चभ्यः ॥ ९८ ॥

अड्गार्ग्यगालवयोः ॥ ९९ ॥

अदः सर्वेषाम् ॥ १०० ॥

अतो दीर्घो यञि ॥ १०१ ॥

सुपि च ॥ १०२ ॥

बहुवचने झल्येत् ॥ १०३ ॥

१ अतो दीर्घाद्बहुवचन एत्त्वं विप्रतिषेधेन ।

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । संयोगे गुरुसंज्ञायां गुणो भेत्तुन सिध्यति । विध्यपेक्षं लघोश्चासौ । कथं कुण्डिर्न दुष्यति । धातोर्नुमः । कथं रञ्जेः । स्यन्दिश्रन्थ्योर्निपातनात् । अनङ्लापशिदीर्घत्व विध्यपेक्षे न सिध्यतः । अभ्यस्तस्य यदाहाचि । लङ्य तत्कृतं भवेत् ।

ओसि च ॥ १०४ ॥

आङि चापः ॥ १०५ ॥

संबुद्धौ च ॥ १०६ ॥

अम्बार्थनद्योर्ह्रस्वः १०७ ॥

ह्रस्वस्य गुणः ॥ १०८ ॥

जसि च ॥ १०९ ॥

१ जसादिषु छन्दसि वावचनं प्राङ् णौ चङ्युपधायाः ।

२ अम्बे दर्वि शतक्रत्वः पश्वे नृभ्यः किकिदीव्या ।

ऋतो ङिसर्वनामस्थानयोः ॥ ११० ॥

घेर्ङिति ॥ १११ ॥

१ घेर्ङिति गुणविधाने ङीसार्वधातुके प्रतिषेधः ।

२ सुब्धिकारात्सिद्धम् ।

आण्नद्याः ॥ ११२ ॥

याडापः ॥ ११३ ॥

१ याड्विधानेऽतिखट्वायेत्यप्रतिषेधो ह्रस्वादेशत्वात् ।

सर्वनाम्नः स्याड्ढ्रस्वश्च ॥ ११४ ॥

विभाषा द्वितीयातृतीयाभ्याम् ॥११५॥

ङेराम् नद्याम्नीभ्यः ॥ ११६ ॥

१ इदुद्भ्यामाम्विधानमौत्त्वस्य परत्वात् ।

२ योगविभागात्सिद्धम् ।

इदुद्भ्याम् ॥ ११७ ॥

औत् ॥ ११८ ॥

अच्च घेः ॥ ११९ ॥

१ औत्त्वे योगविभागः ।

२ सखिपतिभ्यामौत्त्वार्थः ।

३ एकयोगे ह्यप्राप्तिरत्वसंनियोगात् ।

४ न वाकारस्यान्वाचयवचनाद्यथा क्यङि सलोपः ।

५ अत्त्वे टाप्प्रतिषेधः ।

६ न वा संनिपातलक्षणस्यानिमित्तत्वात् ।

७ डित्करणाद्वा ।

आङो नाऽस्त्रियाम् ॥ १२० ॥

॥ इति सप्तमाध्यायस्य तृतीयः पादः ॥

णौ चङ्युपधाया ह्रस्वः ॥ १ ॥

१ णौ चङ्युपधाग्रहणमन्त्यप्रतिषेधार्थम् ।

२ उपधाह्रस्वत्वे णेर्णिच्युपसंख्यानम् ।

नाग्लोपिशास्वृदिताम् ॥ २ ॥

१ अग्लोपिप्रतिषेधानर्थक्यं च स्थानिवद्भावात् ।

भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्[२] ॥ ३ ॥

लोपः पिबतेरीच्चाभ्यासस्य ॥ ४ ॥

तिष्ठतेरित् ॥ ५ ॥

जिघ्रतेर्वा ॥ ६ ॥

उर्ऋत् ॥ ७ ॥

नित्यं छन्दसि ॥ ८ ॥

दयतेर्दिगि लिटि ॥ ९ ॥

---

१ प. पुस्तके इतः परमधिकम् । डउऋवतीनां प्रतिषेधो वक्तव्यः । तन्ह्रस्वत्वं वा ङिसंबुद्ध्योः अम्बार्थं द्व्यक्षरं यदि । मातणां मातच् पुत्रार्थमर्हते । २ प. पुस्तके इतः परमधिकम् । काण्यादीनां चेति वक्तव्यम् ।

१ दिग्यादेशस्य परत्वात्साभ्यासस्यादेशवचनम् ।

ऋतश्च संयोगादेर्गुणः ॥ १० ॥

१ संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थम् ।

२ ऋतो लिटि गुणाञ्ज्णिति वृद्धिर्विप्रतिषेधेन ।

३ पुनःप्रसङ्गविज्ञानाद्वा सिद्धम् ।

ऋच्छत्यृृताम् ॥ ११ ॥

शॄदॄप्रां ह्रस्वो वा ॥ १२ ॥

१ ऋतो ह्रस्वत्वमित्त्वप्रतिषेधार्थम् ।

केऽणः ॥ १३ ॥

१ केऽणो ह्रस्वत्वे तद्धितग्रहणं कृन्निवृत्त्यर्थम् ।

न कपि ॥ १४ ॥

आपो ऽन्यतरस्याम् ॥ १५ ॥

ऋदृशो ऽङि गुणः ॥ १६ ॥

अस्यतेस्थुक् ॥ १७ ॥

श्वयतेरः ॥ १८ ॥

पतः पुम् ॥ १९ ॥

वच उम् ॥ २० ॥

शीङः सार्वधातुके गुणः ॥ २१ ॥

अयङ् यि क्ङिति ॥ २२ ॥

उपसर्गाद्ध्रस्व ऊहतेः ॥ २३ ॥

एतेर्लिङि ॥ २४ ॥

१ एतेर्लिङ्युपसर्गात् ।

अकृत्सार्वधातुकयोर्दीर्घः ॥ २५ ॥

च्वौ च ॥ २६ ॥

रीङ् ऋतः ॥ २७ ॥

रिङ् शयग्लिङ्क्षु ॥ २८ ॥

गुणो ऽर्तिसंयोगाद्योः ॥ २९ ॥

यङि च ॥ ३० ॥

१ यङ्प्रकरणे हन्तेर्हिंसायामीट् ।

ई घ्राध्मोः ॥ ३१ ॥

अस्य च्वौ ॥ ३२ ॥

क्यचि च ॥ ३३ ॥

अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु ॥ ३४ ॥

न च्छन्दस्यपुत्रस्य[1] ॥ ३५ ॥

१ छन्दसि प्रतिषेधे दीर्घप्रतिषेधः ।

२ न वाश्वाघस्याद्वचनमवधारणार्थम् ।

दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति ॥३६॥

अश्वाघस्यात् ॥ ३७ ॥

देवसुम्नयोर्यजुषि काठके ॥ ३८ ॥

कव्यध्वरपृतनस्यर्चि लोपः ॥ ३९ ॥

द्यति स्यतिमास्थामित्ति किति ॥ ४०

शाछोरन्यतरस्याम् ॥ ४१ ॥

१ श्यतेरित्त्वं व्रते नित्यम् ।

दधातेर्हिः ॥ ४२ ॥

जहातेश्च क्त्वि ॥ ४३ ॥

विभाषा छन्दसि ॥ ४४ ॥

सुधित वसुधित नेमधित धिष्व धिषीय च ॥ ४५ ॥

दो दद्घोः[2] ॥ ४६ ॥

---

१ प. पुस्तके इतः परमधिकम् । अपुत्रादीनामिति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् न्ताते दोषो दीर्घत्वं स्यात् । तान्ते दोषो निष्ठानत्वम् । धान्ते दोषो धत्वप्राप्तिः । थान्तेऽदोषस्तस्मात्थान्तः

अच उपसर्गात्तः ॥ ४७ ॥

१ अच उपसर्गात्तत्व आकारग्रहणम् ।

२ आदेर्हि परस्य ।

३ अवर्णप्रकरणात्सिद्धम् ।

४ घेतेरित्त्वादघस्तः ।

अपो भि ॥ ४८ ॥

१ अपो भि मासश्छन्दसि[1] ।

सः स्यार्धधातुके ॥ ४९ ॥

तासस्त्योर्लोपः ॥ ५० ॥

रि च ॥ ५१ ॥

ह एति ॥ ५२ ॥

यीवर्णयोर्दीधीवेव्योः ॥ ५३ ॥

सनि मीमाघुरभलभशकपतपदामच इस् ॥ ५४ ॥

१ इस्त्वं सनि राधो हिंसायाम् ।

आप्ज्ञप्यृधामीत् ॥ ५५ ॥

१ ज्ञपेरीत्त्वमनन्त्यस्य ।

दम्भ इच्च ॥ ५६ ॥

मुचो ऽकर्मकस्य गुणो वा ॥ ५७ ॥

अत्र लोपो ऽभ्यासस्य ॥ ५८ ॥

१ अभ्यासस्यानचि ।

ह्रस्वः ॥ ५९ ॥

हलादिः शेषः ॥ ६० ॥

१ हलादिशेषे षष्ठीसमास इति चेदजादिषु शेषप्रसङ्गः ।

२ कर्मधारय इति चेदादिशेषनिमित्तत्वाल्लोपस्य तदभावे लोपवचनम् ।

३ तस्मादनादिलोपः ।

४ [2]उक्तं वा ।

शर्पूर्वाः खयः ॥ ६१ ॥

१ शर्पूर्वशेषे खर्पूर्वग्रहणम् ।

२ आदिशेषप्रसङ्गस्तु ।

३ शर्पूर्ववचनं किमर्थमिति चेत्खयां लोपप्रतिषेधार्थम् ।

४ व्यपकर्षविज्ञानात्सिद्धम् ।

कुहोश्चुः ॥ ६२ ॥

न कवतेर्यङि ॥ ६३ ॥

कृपेश्छन्दसि ॥ ६४ ॥

दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्ते ऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतो दविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्या गनीगन्तीति च ॥ ६५ ॥

उरत् ॥ ६६ ॥

द्युतिस्वाप्योः संप्रसारणम् ॥ ६७ ॥

१ स्वापिग्रहणं व्यपेतार्थम् ।

२ तत्र क्यजन्ते ऽतिप्रसङ्गः ।

३ सिद्धं तु णिज्ग्रहणात् ।

व्यथो लिटि ॥ ६८ ॥

दीर्घ इणः किति ॥ ६९ ॥

अत आदेः ॥ ७० ॥

तस्मान्नुड्द्विहलः ॥ ७१ ॥

अश्नोतेश्च ॥ ७२ ॥

भवतेरः ॥ ७३ ॥

ससूवेति निगमे ॥ ७४ ॥

निजां त्रयाणां गुणः श्लौ ॥ ७५ ॥

---

१ प. पुस्तके इतः परमधिकम् । स्ववस्स्वतवसोर्मास उषसश्च त इष्यते । २ प. पुस्तके नास्ति ।

१ त्रिग्रहणानर्थक्यं तु गणान्तत्वात् ।

२ उत्तरार्थं तु ।

भृञामित् ॥ ७६ ॥

अर्तिपिपर्त्योश्च ॥ ७७ ॥

बहुलं छन्दसि ॥ ७८ ॥

सन्यतः ॥ ७९ ॥

ओः पुयण्ज्यपरे ॥ ८० ॥

स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ॥ ८१ ॥

गुणो यङ्लुकोः ॥ ८२ ॥

१ ऐचोर्यङि दीर्घप्रसङ्गो ह्रस्वादि परं दीर्घत्वम् ।

२ न वाभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात् ।

३ प्रयोजनं सन्वद्भावस्य दीर्घत्वम् ।

४ मान्प्रभृतीनां दीर्घत्वमित्त्वस्य ।

५ गणेरीत्वं हलादिशेषस्य ।

दीर्घो ऽकितः ॥ ८३ ॥

१ अकिद्वचनमन्यत्र किदन्तस्यालोऽन्त्यनिवृत्त्यर्थम् ।

२ प्रयोजनं ह्रस्वत्वात्त्वेत्त्वगुणेषु ।

३ विप्रतिषेधात्सिद्धम् ।

४ तदन्ताग्रहणाद्वा ।

नीग्वञ्चुस्रंसुध्वंसुभ्रंशुकसपतपदस्कन्दाम् ॥ ८४ ॥

नुगतो ऽनुनासिकान्तस्य ॥ ८५ ॥

१ नुकि यंयम्यते रंरम्यत इति रूपासिद्धिः ।

२ अनुस्वारागमवचनात्सिद्धम् ।

३ पदान्तवच्च ।

जपजभदहदशभञ्जपशां च ॥ ८६ ॥

चरफलोश्च ॥ ८७ ॥

उत्परस्यातः ॥ ८८ ॥

ति च ॥ ८९ ॥

रीगृदुपधस्य च ॥ ९० ॥

१ रीगृत्वतः संयोगार्थम् ।

रुग्रिकौ च लुकि ॥ ९१ ॥

१ मर्मृज्यते मर्मृज्यमानास इति चोपसंख्यानम् ।

ऋतश्च ॥ ९२ ॥

सन्वल्लघुनि चङ्परे ऽनग्लोपे ॥ ९३ ॥

१ सन्वद्भावदीर्घत्वे णेर्णिच्युपसंख्यानम् ।

२ मीमादीनां तु लोपप्रसङ्गः ।

३ सिद्धं तु रूपातिदेशात् ।

४ अङ्गान्यत्वाद्वा सिद्धम् ।

दीर्घो लघोः ॥ ९४ ॥

अत् स्मृदृत्वरप्रथम्रदस्तॄस्पशाम् ॥ ९५ ॥

विभाषा वेष्टिचेष्टयोः ॥ ९६ ॥

ई च गणः ॥ ९७ ॥

॥ इति सप्तमाध्यायस्य चतुर्थः पादः ॥

अष्टमोऽध्यायः ।

सर्वस्य द्वे ॥ १ ॥

१ सर्ववचनमलोऽन्त्यनिवृत्त्यर्थम्[1] ।

२ षष्ठीनिर्देशार्थं च ।

---

[1] प. पुस्तके °सर्वग्रहण° ।

३ अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः ।

४ न वा पदाधिकारात् ।

५ तच्च समासतद्धितवाक्यनिवृत्त्यर्थम् ।

६ सगतिग्रहणं च ।

तस्य परमाम्रेडितम् ॥ २ ॥

अनुदात्तं च ॥ ३ ॥

नित्यवीप्सयोः ॥ ४ ॥

१ अनवयवाभिधानं वीप्सार्थ इति चेज्जात्याख्यायां द्विर्वचनप्रसङ्गः ।

२ न वैकार्थत्वाज्जातेः ।

३ अनेकार्थाश्रयत्वाच्च वीप्सायाः ।

४ निवर्तकत्वाद्वा ।

५ सर्वपदसगतिग्रहणानर्थक्यं चार्थाभिधाने द्विर्वचनविधानात् ।

६ वीप्सायां सर्वाभिधाने वचनाप्रसिद्धिः ।

७ एकाभिधानेऽसर्वद्रव्यगतिः ।

८ न वा पदार्थत्वात् ।

परेर्वर्जने ॥ ५ ॥

१ परेरसमासे ।

२ परेर्वर्जने वावचनम् ।

प्रसमुपोदः पादपूरणे ॥ ६ ॥

उपर्यध्यधसः सामीप्ये ॥ ७ ॥

वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु ॥ ८ ॥

१ असूयाकुत्सनयोःकोपभर्त्सनयोश्चैकार्थत्वात्पृथक्त्वनिर्देशानर्थक्यम् ।

एकं बहुव्रीहिवत् ॥ ९ ॥

१ एकस्य द्विर्वचनसंबन्धेनेति चेदर्थनिर्देशः ।

२ न वा वीप्साधिकारात् ।

३ बहुव्रीहिवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावौ ।

४ सर्वनामस्वरसमासान्तेषु दोषः ।

आबाधे च ॥ १० ॥

कर्मधारयवदुत्तरेषु ॥ ११ ॥

१ कर्मधारयवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि ।

प्रकारे गुणवचनस्य ॥ १२ ॥

१ प्रकारे सर्वेषां गुणवचनत्वात्सर्वप्रसङ्गः ।

२ सिद्धं तु प्रकृत्यर्थविशेषणत्वात् ।

[३ आनुपूर्व्ये ।]

४ स्वार्थेऽवधार्यमाणेऽनेकस्मिन् ।

[५ चापले ।]

६ क्रियासमभिहारे ।

[७ आभीक्ष्ण्ये ।]

८ डाचि च ।

९ पूर्वप्रथमयोरर्थातिशयविवक्षायाम् ।

१० डतरडतमयोः समसंप्रधारणायां स्त्रीनिगदे भावे ।

११ कर्मव्यतिहारे सर्वनाम्नः समासवच्च बहुलं यदा न समासवत् प्रथमैकवचनं तदा पूर्वपदस्य ।

१२ स्त्रीनपुंसकयोरुत्तरपदस्य वाम्भावः ।

अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् ॥ १३ ॥

यथास्वे यथायथम् ॥ १४ ॥

द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ॥ १५ ॥

१ अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्युपसंख्यानम् ।

२ द्वन्द्वमिति पूर्वपदस्य चाम्भाव उत्तरपदस्य चात्वं नपुंसकत्वं च ।

३ उक्तं वा ।[1]

पदस्य ॥ १६ ॥

पदात् ॥ १७ ॥

१ पदाधिकारः प्रागपदान्ताधिकारात् ।

२ पदात्प्राक्सुपि कुत्सनात् ।

३ यणेकादेशस्वरस्तूर्ध्वं पदाधिकारात् ।

४ इह वचने ह्यपदान्तस्याप्राप्तिः ।

५ न वा पदाधिकारस्य विशेषणत्वात् ।

६ अन्तग्रहणाद्वा नलोपे ।

अनुदात्तं सर्वमपादादौ[2] ॥ १८ ॥

१ सर्ववचनमनादेरनुदात्तार्थमिति चेल्लुटि प्रतिषेधात्सिद्धम् ।

२ अलोऽन्त्यविधिप्रसङ्गस्तु ।

३ लुटि प्रतिषेधात्सिद्धम् ।

४ उक्तं वा ।[3]

५ समानवाक्ये निघातयुष्मदस्मदादेशाः ।

६ पश्यार्थैश्च प्रतिषेधः ।

आमन्त्रितस्य च ॥ १९ ॥

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ ॥ २० ॥

बहुवचनस्य वस्नसौ ॥ २१ ॥

तेमयावेकवचनस्य ॥ २२ ॥

त्वामौ द्वितीयायाः ॥ २३ ॥

न चवाहाहैवयुक्ते ॥ २४ ॥

पश्यार्थैश्चानालोचने ॥ २५ ॥

सपूर्वायाः प्रथमाया विभाषा ॥ २६ ॥

१ युष्मदस्मदोरन्यतरस्यामनन्वादेशे[4] ।

तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ॥ २७ ॥

१ तिङो गोत्रादिषु कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम् ।

२ अनुदात्तविशेषणे ह्यन्यत्र गोत्रादिग्रहणे कुत्सनाभीक्ष्ण्यग्रहणम् ।

३ अनुदात्तग्रहणं वा ।

तिङ्तिङः ॥ २८ ॥

१ अतिङ्वचनमनर्थकं समानवाक्याधिकारात् ।

न लुट् ॥ २९ ॥

निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ॥ ३० ॥

१ चणिद्विशिष्टश्चेदर्थे ।

नह प्रत्यारम्भे ॥ ३१ ॥

सत्यं प्रश्ने ॥ ३२ ॥

अङ्गाप्रातिलोम्ये ॥ ३३ ॥

हि च ॥ ३४ ॥

छन्दस्यनेकमपि साकाङ्क्षम् ॥ ३५ ॥

यावद्यथाभ्याम् ॥ ३६ ॥

पूजायां नानन्तरम् ॥ ३७ ॥

उपसर्गव्यपेतं च ॥ ३८ ॥

तुपश्यपश्यताहैः पूजायाम् ॥ ३९ ॥

अहो च ॥ ४० ॥

शेषे विभाषा ॥ ४१ ॥

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । सर्ववचनमनादेरनुदात्तार्थम् । ३ प. पुस्तके नास्ति । ४ प पुस्तके इतः परमधिकम् । सर्व एव वाम्नावादयोऽनन्वादेशे विभाषा वक्तव्याः ।

पुरा च परीप्सायाम् ॥ ४२ ॥

न न्वित्यनुज्ञैषणायाम् ॥ ४३ ॥

किं क्रियाप्रश्ने ऽनुपसर्गमप्रतिषिद्धम् ॥ ४४ ॥

लोपे विभाषा ॥ ४५ ॥

एहि मन्ये प्रहासे लृट् ॥ ४६ ॥

जात्वपूर्वम् ॥ ४७ ॥

किंवृत्तं च चिदुत्तरम् ॥ ४८ ॥

आहो उताहो चानन्तरम् ॥ ४९

शेषे विभाषा ॥ ५० ॥

गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् ॥ ५१ ॥

१ लृटः प्रकृतिभावे कर्तुरन्यत्व उपसंख्यानं कारकान्यत्वात् ।

२ कर्तृसामान्यात्सिद्धमिति चेत्तद्भेदेऽन्यसामान्ये प्रकृतिभावप्रसङ्गः[1] ।

३ न चेत्कर्ता सर्वान्य इति चेदन्याभिधाने प्रतिषेधमेके ।

४ सिद्धं तु तिङोरेकद्रव्याभिधानात् ।

लोट् च ॥ ५२ ॥

विभाषितं सोपसर्गमनुत्तमम् ॥ ५३ ॥

हन्त च ॥ ५४ ॥

आम एकान्तरमामन्त्रितमनन्तिके ॥ ५५ ॥

१ आम एकान्तर ऐकश्रुत्यप्रतिषेधः ।

२ निघातप्रसङ्गस्तु ।

३ सिद्धं तु प्रतिषेधाधिकारे प्रतिषेधवचनात् ।

यद्धितुपरं छन्दसि ॥ ५६ ॥

१ यद्धितुपरस्य च्छन्दस्यनिघातोऽन्यपरप्रतिषेधार्थः ।

चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ॥ ५७ ॥

१ आम्रेडितेष्वगतेः सगतिरपि तिङित्यत्र गतिग्रहण उपसर्गग्रहणम्[2] ।

चादिषु च ॥ ५८ ॥

चवायोगे प्रथमा ॥ ५९ ॥

हेति क्षियायाम् ॥ ६० ॥

अहेति विनियोगे च ॥ ६१ ॥

चाहलोप एवेत्यवधारणम् ॥ ६२ ॥

चादिलोपे विभाषा ॥ ६३ ॥

वै वावेति च च्छन्दसि ॥ ६४ ॥

एकान्याभ्यां समर्थाभ्याम् ॥ ६५ ॥

यद्वृत्तान्नित्यम् ॥ ६६ ॥

१ वा याथाकाम्ये ।

पूजनात्पूजितमनुदात्तम्[3] ॥ ६७ ॥

१ पूजितस्यानुदात्तत्वे काष्ठादिग्रहणम् ।

२ मलोपवचनं च ।

सगतिरपि तिङ् ॥ ६८ ॥

१ सगतिग्रहणमपदत्वात् ।

---

१ प. पुस्तके °प्रसङ्ग इति नास्ति । २ प. पुस्तके इतः परमधिकम् । सर्वत्रैवाष्टमिके गतिग्रहण उपसर्गग्रहणम् । ३ बे. का. प्र. क. चा. नि. पुस्तकेषु काष्ठादिभ्य इत्यधिकम् तत्कश्चित्प्राक्षिप्तमिति कैयटः । भाष्यविरोधात् ।

२ उत्तरार्थं च ।

३ तिङ्निघातात्पूजनात्पूजितमनुदात्तं विप्रतिषेधेन ।

कुत्सने च सुप्यगोत्रादौ[1] ॥ ६९ ॥

गतिर्गतौ ॥ ७० ॥

१ गतेरनुदात्तत्वे गतिग्रहणानर्थक्यं तिङ्यवधारणात् ।

२ छन्दोऽर्थमिति चेन्नागतित्वात् ।

तिङि चोदात्तवति ॥ ७१ ॥

१ तिङ्ग्रहणमुदात्तवतः परिमाणार्थम्[2] ।

२ यद्योगाद्गतिरिति चेत्प्रत्ययोदात्तत्वेऽप्रसिद्धिः ।

आमन्त्रितं पूर्वमविद्यमानवत् ॥ ७२ ॥

१ पूर्वं[3] प्रति विद्यमानवत्वादुत्तरत्रानन्तर्याप्रसिद्धिः ।

२ सिद्धं तु पदपूर्वस्येति वचनात् ।

३ अविद्यमानवत्त्वे प्रयोजनमामन्त्रितयुष्मदस्मत्तिङ्घाताः ।

४ पूजायामनन्तरप्रतिषेधः ।

५ जात्वपूर्वम् ।

६ आहो उताहो चानन्तरविधौ ।

७ आम एकान्तरविधौ

नामन्त्रिते समानाधिकरणे[3] ॥ ७३ ॥

[4]सामान्यवचनं विभाषितं विशेषवचने ॥ ७४ ॥

॥ इत्यष्टमाध्यायस्य प्रथमः पादः ॥

पूर्वत्रासिद्धम्[5] ॥ १ ॥

१ पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य ।

२ अपवादो वचनप्रामाण्यात् ।

३ पूर्वत्रासिद्धमधिकारः ।

४ परस्य परस्य पूर्वत्र पूर्वत्रासिद्धविज्ञानार्थम् ।

५ अनधिकारे हि समुदायस्य समुदायेऽसिद्धविज्ञानम् ।

६ तत्रायथेष्टप्रसङ्गः ।

७ तस्मादधिकारः ।

८ असिद्धवचन[6] उक्तम् ।

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ।२।

१ संज्ञाग्रहणानर्थक्यं च तन्निमित्तत्वाल्लोपस्य ।

२ स्वरेऽवधारणाच्च ।

३ तुग्विधौ चोक्तम् ।

न मु ने ॥ ३ ॥

१ न मु टादेशे ।

---

१ प. पुस्तक इतः परमधिकम् । सुपि कुत्सने क्रियायाः । मकारलोपोऽतिङि । पूतिश्चानुबन्धः । विभाषितं च पि बह्वर्थम् । २ प. पुस्तके इतः परमधिकम् । यद्योगाद्गतिः । ३ वे. का. प्र. नि. वा. सामान्यवचनमित्यधिकम् । ४ वे. का प्र. नि. वा. पुस्तकेषु सामान्यवचनमिति नास्ति । एष्वेव पुस्तकेषु अन्ते बहुवचनमित्यधिकम् । ५–६ प. पुस्तके नास्ति ।

उदात्तस्वरितयोर्यणः स्वरितो ऽनुदात्तस्य ॥ ४ ॥

१ यण्स्वरो यणादेशे स्वरितयणः स्वरितार्थम् ।

२ आश्रयात्सिद्धत्वमिति चेदुदात्तात्स्वरिते दोषः ।

एकादेश उदात्तेनोदात्तः ॥ ५ ॥

स्वरितो वानुदात्ते पदादौ ॥ ६ ॥

१ एकादेशस्वरोऽन्तरङ्गः ।

२ अयवायावेकादेशशतृस्वरैकाननुदात्तसर्वानुदात्तार्थम् ।

३ संयोगान्तलोपो रोरुत्वे हरिवो मेदिनं त्वा ।

४ प्लुतिश्च ।

५ सिज्लोप एकादेशे ।

६ संयोगादिलोपः संयोगान्तलोपे ।

७ निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु ।

८ वस्वादिषु दत्वं सौ दीर्घत्वे ।

९ अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे ।

१० प्रगृह्यसंज्ञायां च ।

११ प्लुतिस्तुग्विधौ छे ।

१२ श्चुत्वं धुट्त्वे ।

१३ अभ्यासजश्त्वचर्त्वमेत्वतुकोः ।

१४ द्विर्वचने परसवर्णत्वम् ।

१५ पदाधिकारश्चेल्लत्वघत्वनत्वरुत्वषत्वणत्वानुनासिकछत्वानि ।

नलोपः प्रातिपदिकान्तस्य ॥ ७ ॥

१ नलोपेऽन्तग्रहणं पदाधिकारस्य विशेषणत्वात् ।

२ अह्नो नलोपप्रतिषेधः ।

३ अहन्ग्रहणादिति चेत्संबुद्ध्यर्थं वचनम् ।

न ङिसंबुद्ध्योः ॥ ८ ॥

१ न ङिसंबुध्योरनुत्तरपदे ।

२ वा नपुंसकानाम् ।

३ भत्वात्तु ङौ प्रतिषेधानर्थक्यम् ।

मादुपधायाश्च मतोर्वो ऽयवादिभ्यः ॥९॥

१ अनन्त्ययोरपि निष्ठामतुपोरादेशः ।

२ नार्मते प्रतिषेधः ।

३ उक्तं वा ।

झयः ॥ १० ॥

संज्ञायाम् ॥ ११ ॥

आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ॥ १२ ॥

उदन्वानुदधौ ॥ १३ ॥

राजन्वान्सौराज्ये ॥ १४ ॥

छन्दसीरः ॥ १५ ॥

अनो नुट् ॥ १६ ॥

१ अनो नुकि विनामरुविधिप्रतिषेधः ।

२ परादौ वत्वप्रतिषेधोऽवग्रहश्च ।

३ भत्वात्सिद्धम् ।

४ अनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि ।

५ घग्रहणं च ।

नाद्घस्य ॥ १७ ॥

१ ईद्रथिनः ।

---

१ प. पुस्तके नास्ति । २ 'न संप्रसारण' इति सूत्रभाष्ये 'कक्षायाः संज्ञायां मतौ संप्रसारणं वक्तव्यम्' इत्यारब्धम् । अतोऽत्र सूत्रे कक्षीवच्छब्दपाठः अनार्ष इत्याहुः ।

२ सिद्धं तु प्रतिपदविधानान्नुमः ।

तिप्यनस्तेः ॥ ७३ ॥

सिपि धातो रुर्वा ॥ ७४ ॥

दश्च ॥ ७५ ॥

र्वोरुपधाया दीर्घ इकः ॥ ७६ ॥

हलि च ॥ ७७ ॥

उपधायां च ॥ ७८ ॥

१ उपधादीर्घत्वेऽभ्यासजित्रिचतुर्णां प्रतिषेधः ।

२ उणादिप्रतिषेधश्च ।

न भकुर्छुराम् ॥ ७९ ॥

अदसो ऽसेर्दादु दो मः ॥ ८० ॥

१ अदसोऽनोस्तेः ।

२ तत्र पदाधिकारादपदान्तस्याप्राप्तिः ।

३ सिद्धं तु सकारप्रतिषेधात् ।

४ दाद्ग्रहणमन्त्यप्रतिषेधार्थम् ।

एत ईद्बहुवचने ॥ ८१ ॥

१ ईत्वं बहुवचनान्तस्य ।

वाक्यस्य टेः प्लुत उदात्तः ॥ ८२ ॥

१ वाक्याधिकारः पदनिवृत्त्यर्थः ।

२ टिग्रहणमलोऽन्त्यनियमे व्यञ्जनान्तार्थम् ।

३ सर्वादेशप्रसङ्गस्तु ।

४ उक्तं वा ।

प्रत्यभिवादे ऽशूद्रे ॥ ८३ ॥

१ अशूद्रस्त्र्यसूयकेषु ।

२ भोराजन्यविशां वा[2] ।

दूराद्धूते च ॥ ८४ ॥

हैहेप्रयोगे हैहयोः ८५ ॥

१ हैहेप्रयोगे हैहेग्रहणं हैहयोः प्लुत्यर्थम् ।

२ प्रयोगग्रहणमर्थवद्ग्रहणेऽनर्थकार्थम् ।

३ पुनर्हैहेग्रहणमन्त्यार्थम् ।

गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ॥ ८६ ॥

१ गुरोः प्लुतविधाने लघोरन्त्यस्य प्लुतप्रसङ्गोऽन्येन विहितत्वात् ।

२ न वानन्त्यस्यापीति वचनमुभयनिर्देशार्थम् ।

३ प्राग्वचनं विभाषार्थम् ।

४ प्राग्वचनानर्थक्यं चैकैकस्येति वचनात् ।

ओमभ्यादाने ॥ ८७ ॥

ये यज्ञकर्मणि ॥ ८८ ॥

१ ये यज्ञकर्मणीत्यतिप्रसङ्गः ।

२ सिद्धं तु ये यजामह इति ब्रूह्यादिषूपसंख्यानात् ।

प्रणवष्टेः ॥ ८९ ॥

१ टिग्रहणं सर्वादेशार्थम् ।

याज्यान्तः ॥ ९० ॥

ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ॥ ९१ ॥

अग्नीत्प्रेषणे परस्य च ॥ ९२ ॥

१ अग्नीत्प्रेषण इत्यतिप्रसङ्गः ।

२ सिद्धं त्वोश्रावये परस्य चेति वचनात्[3] ।

विभाषा पृष्टप्रतिवचने हेः ॥ ९३ ॥

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । सर्वस्यैव नाम्नः प्रत्यभिवादे भोः शब्द आदेशो वक्तव्यः । ३ प. पुस्तके इतः परमधिकम् । ओश्रावयाश्रावयोरिति वक्तव्यम् । बहुलमन्यत्रेति वक्तव्यम् ।

निगृह्यानुयोगे च ॥ ९४ ॥

आम्रेडितं भर्त्सने ॥ ९५ ॥

१ भर्त्सने पर्यायेण ।

अङ्गयुक्तं तिङाकाङ्क्षम् ॥ ९६ ॥

विचार्यमाणानाम् ॥ ९७ ॥

पूर्वं तु भाषायाम् ॥ ९८ ॥

प्रतिश्रवणे च ॥ ९९ ॥

अनुदात्तं प्रश्नान्ताभिपूजितयोः ॥१००॥

चिदिति चोपमार्थे प्रयुज्यमाने ॥१०१॥

उपरि स्विदासीदिति च ॥ १०२ ॥

स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु ॥ १०३ ॥

१ असूयादिषु वावचनम् ।

क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् ॥ १०४ ॥

अनन्त्यस्यापि प्रश्नाख्यानयोः ॥१०५॥

प्लुतावैच इदुतौ ॥ १०६ ॥

१ ऐचोरुभयविवृद्धिप्रसङ्गादिदुतोः प्लुतवचनम् ।

२ तत्रायथेष्टप्रसङ्गः ।

३ सिद्धं त्विदुतोर्दीर्घवचनात् ।

एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ॥ १०७ ॥

१ एचः[1] प्लुतविकारे पदान्तग्रहणम् ।

२ विषयपरिगणनं च ।

३ आमन्त्रिते छन्दस्युपसंख्यानम् ।

तयोर्य्वावचि संहितायाम् ॥ १०८ ॥

॥ इत्यष्टमाध्यायस्य द्वितीयः पादः ॥

मतुवसो रु संबुद्धौ छन्दसि ॥ १ ॥

१ मतुवसो रादेशे वन उपसंख्यानम् ।

२ विभाषा भवद्भगवदघवतामोच्चावस्य ।

अत्रानुनासिकः पूर्वस्य तु वा ॥ २ ॥

आतोऽटि नित्यम् ॥ ३ ॥

अनुनासिकात्परोऽनुस्वारः ॥ ४ ॥

समः सुटि ॥ ५ ॥

पुमः खय्यम्परे ॥ ६ ॥

नश्छव्यप्रशान् ॥ ७ ॥

उभयथर्क्षु ॥ ८ ॥

दीर्घादटि समानपादे ॥ ९ ॥

नॄन्पे ॥ १० ॥

स्वतवान्पायौ ॥ ११ ॥

कानाम्रेडिते ॥ १२ ॥

१ संपुंकानां सत्वम् ।

२ रुविधौ ह्यनिष्टप्रसङ्गः ।

ढो ढे लोपः ॥ १३ ॥

१ ढलोपेऽपदान्तग्रहणम् ।

२ जश्भावादिति चेदुत्तरत्र ढस्याभावादपवादप्रसङ्गः ।

३ तस्मात्सिद्धवचनम् ।

४ संग्रहणं वा ।

रो रि ॥ १४ ॥

खरवसानयोर्विसर्जनीयः ॥ १५ ॥

---

१ प. पुस्तके एच इति नास्ति । २ प. पुस्तके इतः परमधिकम् । प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्विति वक्तव्यम् ।

१ विसर्जनीयोऽनुत्तरपदे ।

२ न वा बहिरङ्गलक्षणत्वात् ।

रोः सुपि ॥ १६ ॥

भोभगोअघोअपूर्वस्य योऽशि ॥ १७ ॥

१ अश्ग्रहणमनर्थकमन्यत्राभावात् ।

व्योर्लघुप्रयत्नतरः शाकटायनस्य ॥ १८ ॥

लोपः शाकल्यस्य ॥ १९ ॥

ओतो गार्ग्यस्य ॥ २० ॥

१ ओकाराल्लोपवचनं नित्यार्थम् ।

उञि च पदे ॥ २१ ॥

हलि सर्वेषाम् ॥ २२ ॥

मोऽनुस्वारः ॥ २३ ॥

नश्चापदान्तस्य झलि ॥ २४ ॥

मो राजि समः क्वौ ॥ २५ ॥

हे मपरे वा ॥ २६ ॥

१ यवलपरे यवला वा ।

नपरे नः २७ ॥

ङ्णोः कुक्टुक् शरि ॥ २८ ॥

डः सि धुट् ॥ २९ ॥

नश्च ॥ ३० ॥

शि तुक् ॥ ३१ ॥

ङमो ह्रस्वादचि ङमुण्नित्यम् ॥ ३२ ॥

१ धुगादिषु छुत्वणत्वप्रतिषेधः ।

२ परादौ छत्वषत्वविधिप्रतिषेधः ।

३ ङमुटि पदादिग्रहणम् ।

मय उञो वो वा ॥ ३३ ॥

विसर्जनीयस्य सः ॥ ३४ ॥

शर्परे विसर्जनीयः ॥ ३५ ॥

वा शरि ॥ ३६ ॥

१ वाशर्प्रकरणे खर्परे लोपः ।

कुप्वोः ᳲकᳲपौ च ॥ ३७ ॥

१ सस्था कुप्वोर्विसर्जनीयजिह्वामूलीयोपध्मानीयाः ।

१ विसर्जनीयादेशे हि शर्परयोरेवादेशप्रसङ्गः ।

सो ऽपदादौ ॥ ३८ ॥

१ सोऽपदादावनव्ययस्य ।

२ रोः काम्ये नियमार्थम् ।

इणः षः ॥ ३९ ॥

नमस्पुरसोर्गत्योः ॥ ४० ॥

इदुदुपधस्य चाप्रत्ययस्य ॥ ४१ ॥

१ इदुदुपधस्य चाप्रत्ययस्येति चेत्पुम्मुहुसोः प्रतिषेधः ।

२ प्लुतानां तादौ च ।

३ न वा बहिरङ्गलक्षणत्वात् ।

४ भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात्षत्वप्रतिषेधस्य ।

तिरसो ऽन्यतरस्याम् ॥ ४२ ॥

द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ॥ ४३ ॥

इसुसोः सामर्थ्ये ॥ ४४ ॥

नित्यं समासे ऽनुत्तरपदस्थस्य[3] ॥ ४५ ॥

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । वृद्धिभूतानां षत्वं वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । नानापदार्थयोर्वर्तमानयोः स्यायते यदा योगः । तस्मिन्षत्वं कार्यं तद्युक्तं तत्र मे नेह । ऐकार्थ्ये सामर्थ्ये वाक्ये षत्वं न मे प्रसज्येत । तस्मादिह व्यपेक्षां सामर्थ्यं साधु मन्यते । अथ चेद्रूढन्तमेतत्ततोऽधिके नैव मे भवेत्प्राप्तिः । वाक्ये च मे विभाषा प्रतिषेधो न प्रकल्प्येत । अथ चेत्संविज्ञानं नित्ये षत्वे ततो विभाषेयम् । सिद्धं च मे समासे प्रतिषेधार्थस्तु यत्नोऽयम् ।

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ॥ ४६ ॥

अधःशिरसी पदे ॥ ४७ ॥

कस्कादिषु च ॥ ४८ ॥

छन्दसि वाप्राम्रेडितयोः ॥ ४९ ॥

कःकरत्करतिकृधिकृतेष्वनदितेः ॥५०॥

पञ्चम्याः परावध्यर्थे ॥ ५१ ॥

पातौ च बहुलम् ॥ ५२ ॥

षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ॥ ५३ ॥

इडाया वा ॥ ५४ ॥

अपदान्तस्य मूर्धन्यः ॥ ५५ ॥

सहेः साडः सः ॥ ५६ ॥

१ साडः षत्वे समानशब्दप्रतिषेधः[1] ।

२ अर्थवद्ग्रहणात्सिद्धमिति चेत्तद्धितलोपेऽर्थवत्त्वात्प्रतिषेधः ।

इण्कोः ॥ ५७ ॥

नुम्विसर्जनीयशर्व्यवायेऽपि ॥ ५८ ॥

१ नुम्विसर्जनीयशर्व्यवाये निंसेः प्रतिषेधः।

२ योगविभागात्सिद्धम् ।

आदेशप्रत्यययोः ॥ ५९ ॥

१ आदेशप्रत्यययोः षत्वे सरकः[2] प्रतिषेधः।

२ बहुलवचनात्सिद्धम् ।

३ आदेशप्रत्यययोरित्यवयवषष्ठी चेद्द्विर्वचने प्रतिषेधः ।

४ समानाधिकरणानां चाप्राप्तिः ।

५ नानाविभक्तीनां च[3] समासानुपपत्तिः ।

६ योगविभागात्सिद्धम् ।

७ [4]उक्तं वा ।

शासिवसिघसीनां च ॥ ६० ॥

स्तौतिण्योरेव षण्यभ्यासात् ॥ ६१ ॥

सः स्विदिस्वदिसहीनां च ॥ ६२ ॥

प्राक्सितादड्व्यवायेऽपि ॥ ६३ ॥

स्थादिष्वभ्यासेन चाभ्यासस्य ॥ ६४ ॥

१ स्थादिष्वभ्यासवचनं नियमार्थम् ।

२ तद्व्यवाये चापोपदेशार्थम् ।

३ अवर्णार्थं षणि प्रतिषेधार्थं च ।

उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ॥ ६५ ॥

१ उपसर्गात्षत्वे निस उपसंख्यानमनिणन्तत्वात्[5] ।

२ न वा वर्णाश्रयत्वात्षत्वस्य तद्विशेषक उपसर्गो धातुश्च ।

३ सुनोत्यादीनां षत्वे ण्यन्तस्योपसंख्यानमधिकत्वात् ।

४ न वावयवस्यानन्यत्वात् ।

५ नामधातोस्तु प्रतिषेधः ।

६ न वानुपसर्गत्वात् ।

सदिरप्रतेः ॥ ६६ ॥

---

१ प. पुस्तके इतः परमधिकम् । अर्थवद्ग्रहणात्सिद्धम् । २ प. पुस्तके सरगादीनामिति । ३-४ प. पुस्तके नास्ति । ५ प. पुस्तके अनिणन्तत्वादिति नास्ति ।

स्तम्भेः[1] ॥ ६७ ॥

अवाच्चालम्बनाविदूर्ययोः ॥ ६८ ॥

वेश्च स्वनो भोजने ॥ ६९ ॥

परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ॥ ७० ॥

सिवादीनां वाड्व्यवायेऽपि ॥ ७१ ॥

अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ॥ ७२ ॥

वेः स्कन्देरनिष्ठायाम् ॥ ७३ ॥

परेश्च ॥ ७४ ॥

परिस्कन्दः प्राच्यभरतेषु ॥ ७५ ॥

स्फुरतिस्फुलत्योर्निर्निविभ्यः ॥ ७६ ॥

वेः स्कभ्नातेर्नित्यम् ॥ ७७ ॥

इणःषीध्वंलुङ्लिटां धोऽङ्गात् ॥ ७८ ॥

विभाषेटः ॥ ७९ ॥

१ इण्ग्रहणं ढत्वे कवर्गनिवृत्त्यर्थम् ।

२ तत्र प्रत्ययपरत्व इटो लिटि ढत्वं परादित्वात् ।

३ धकारपरत्वे षीध्वम्यनन्तरत्वादिटो विभाषाभावः ।

४ इण्ग्रहणस्य चाविशेषणत्वात्स्यादिमात्रे ढत्वप्रसङ्गः ।

समासेऽङ्गुलेः सङ्गः ॥ ८० ॥

भीरोः स्थानम् ॥ ८१ ॥

अग्नेः स्तुत्स्तोमसोमाः ॥ ८२ ॥

१ अग्नेर्दीर्घात्सोमस्य ।

२ इतरथा ह्यनिष्टप्रसङ्गः ।

ज्योतिरायुषः स्तोमः ॥ ८३ ॥

मातृपितृभ्यां स्वसा ॥ ८४ ॥

मातुःपितुर्भ्यामन्यतरस्याम्[2] ॥ ८५ ॥

१ मातुःपितुरिति सान्तग्रहणानर्थक्यमेकदेशविकृतस्यानन्यत्वात् ।

अभिनिसः स्तनः शब्दसंज्ञायाम् ॥८६॥

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ॥ ८७ ॥

सुविनिर्दुर्भ्यः सुपिसूतिसमाः[3] ॥ ८८ ॥

निनदीभ्यां स्नातेः कौशले ॥ ८९ ॥

सूत्रं प्रतिष्णातम् ॥ ९० ॥

कपिष्ठलो गोत्रे ॥ ९१ ॥

१ कपिष्ठलो गोत्रप्रकृतौ ।

प्रष्ठोऽग्रगामिनि ॥ ९२ ॥

वृक्षासनयोर्विष्टरः ॥ ९३ ॥

छन्दोनाम्नि च ॥ ९४ ॥

गवियुधिभ्यां स्थिरः ॥ ९५ ॥

विकुशमिपरिभ्यः स्थलम् ॥ ९६ ॥

अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्कुङ्गमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः ॥ ९७ ॥

सुषामादिषु च ॥ ९८ ॥

ह्रस्वात्तादौ तद्धिते ॥ ९९ ॥

---

१ वे. का. चा प्र. पुस्तकेषु स्तन्भेरिति । २ प. पुस्तके इतः परमधिकम् । सान्नाभ्यां चेति वक्तव्यम् । ३ प. पुस्तके इतः परमाधिकम् । सुपेः षत्वं स्वपेर्मा भूत् । विसुष्वापेति केन न । हलादिशेषान्न सुपिः । इष्टं पूर्वं प्रसारणम् । स्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः । अनर्थके विषुषुपुः । सुपिभूतो द्विरुच्यते । ४ प. पुस्तके इतः परमधिकम् । स्थस्थास्थिन्स्थॄणामिति वक्तव्यम् । ५ इतः परम् एति संज्ञायामगात् नक्षत्राद्वा इति सूत्रद्वयं बहुषु पुस्तकेषु समुपलभ्यते । तथापि अनयोर्गणसूत्रत्वमेव न्याय्यम् । एतदुदाहरणानां गणे समुपलम्भात् ।

निसस्तपतावनासेवने ॥ १०० ॥

युष्मत्तत्ततक्षुःष्वन्तःपादम् ॥ १०१ ॥

१ ह्रस्वात्तादौ तिङि प्रतिषेधः ।

यजुष्येकेषाम् ॥ १०२ ॥

स्तुतस्तोमयोश्छन्दसि ॥ १०३ ॥

१ स्तुतस्तोमयोश्छन्दस्यनर्थकं वचनं पूर्वपदादिति सिद्धत्वात् ।

पूर्वपदात् ॥ १०४ ॥

सुञः ॥ १०५ ॥

सनोतेरनः ॥ १०६ ॥

१ सनोतेरन इति च ।

२ सनोतेरन इति नियमार्थमिति चेत्सवनादिकृतत्वात्सिद्धम् ।

३ सनर्थं तु ।

सहेः पृतनर्तभ्यां च ॥ १०७ ॥

न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ॥ १०८ ॥

सात्पदाद्योः ॥ १०९ ॥

सिचो यङि ॥ ११० ॥

सेधतेर्गतौ ॥ १११ ॥

प्रतिस्तब्धनिस्तब्धौ च ॥ ११२ ॥

सोढः ॥ ११३ ॥

स्तम्भुसिवुसहां चङि ॥ ११४ ॥

१ स्तम्भुसिवुसहां चङ्युपसर्गात् ।

सुनोतेः स्यसनोः ॥ ११५ ॥

सदेः परस्य लिटि ॥ ११६ ॥

१ सदो लिटि प्रतिषेधे स्वञ्जेरुपसंख्यानम् ।

निव्यभिभ्यो ऽड्व्यवाये वा छन्दसि ॥ ११७ ॥

॥ इत्यष्टमाध्यायस्य तृतीयः पादः ॥

रषाभ्यां नो णः समानपदे ॥ १ ॥

१ रषाभ्यां णत्व ऋकारग्रहणम् ।

२ ऐकदेशे नुडादिषु चोक्तम् ।

अट्कुप्वाङ्नुम्व्यवाये ऽपि ॥ २ ॥

१ अड्व्यवाये णत्वेऽन्यव्यवाये प्रतिषेधः ।

२ न वान्येन व्यपेतत्वात् ।

३ तत्समुदाये णत्वाप्रसिद्धिर्यथान्यत्र ।

४ कुव्यवाये हादेशेषु प्रतिषेधः ।

५ प्रयोजनं वृत्रघ्नः स्रुघ्नः प्राघानीति ।

६ नुम्व्यवाये णत्वेऽनुस्वाराभावे प्रतिषेधः ।

७ अनागमे च णत्वम् ।

८ अनुस्वारव्यवायवचनात्तु सिद्धम् ।

पूर्वपदात्संज्ञायामगः ॥ ३ ॥

१ पूर्वपदात्संज्ञायामुत्तरपदग्रहणम् ।

२ तद्धितपूर्वपदस्थाप्रतिषेधार्थम् ।

३ संज्ञायां नियमवचने गप्रतिषेधान्नियमप्रतिषेधः ।

४ तत्र नित्यं णत्वप्रसङ्गः ।

५ योगविभागात्सिद्धम् ।

६ अप्रतिषेधो वा यथा सर्वनामसंज्ञायाम् ।

वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः ॥ ४ ॥

---

१ व. का. पुस्तकयोः सदेः स्थाने सदिष्वञ्जोरिति पाठः । २ प. पुस्तके नास्ति ।

अनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्यो ऽसंज्ञायामपि ॥ ५ ॥[1]

विभाषौषधिवनस्पतिभ्याम्[2] ॥ ६ ॥

अह्नो ऽदन्तात्[3] ॥ ७ ॥

वाहनमाहितात्[3] ॥ ८ ॥

पानं देशे ॥ ९ ॥

वा भावकरणयोः ॥ १० ॥

१ वाप्रकरणे गिरिनद्यादीनामुपसंख्यानम् ।

प्रातिपदिकान्तनुम्विभक्तिषु च ॥ ११ ॥

१ प्रातिपदिकान्तस्य णत्वे समासान्तग्रहणमसमासान्तप्रतिषेधार्थम् ।

२ [4]लिङ्गविशिष्टग्रहणे चोक्तम् ।

३ तत्र युवादिप्रतिषेधः ।

एकाजुत्तरपदे णः ॥ १२ ॥

कुमति च ॥ १३ ॥

उपसर्गादसमासे ऽपि णोपदेशस्य ॥ १४ ॥

१ णोपदेशं प्रत्युपसर्गाभावादनिर्देशः ।

२ वचनप्रामाण्यादिति चेत्पदलोपे प्रतिषेधः ।

३ सिद्धं तु यं प्रत्युपसर्गस्तत्स्थस्येति वचनात् ।

हिनु मीना ॥ १५ ॥

१ हिनुमिनाग्रहणे विकृतस्योपसंख्यानम् ।

२ सिद्धमचः स्थानिवत्त्वात् ।

आनि लोट् ॥ १६ ॥

१ आनि लोड्ग्रहणानर्थक्यमर्थवद्ग्रहणात् ।

२ अनुपसर्गाद्वा ।

नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ॥ १७ ॥

१ नेर्गदादिष्वड्व्यवाय उपसंख्यानम् ।

शेषे विभाषाकखादावषान्त उपदेशे ॥ १८ ॥

अनितेः ॥ १९ ॥

अन्तः ॥ २० ॥

१ [5]अनितेरन्तग्रहणं संबुद्ध्यर्थम्[6] ।

उभौ साभ्यासस्य ॥ २१ ॥

हन्तेरत्पूर्वस्य ॥ २२ ॥

१ हन्तेरत्पूर्वस्य वचन उक्तम् ।

वमोर्वा ॥ २३ ॥

अन्तरदेशे ॥ २४ ॥

अयनं च ॥ २५ ॥

छन्दस्यृदवग्रहात् ॥ २६ ॥

नश्च धातुस्थोरुषुभ्यः ॥ २७ ॥

[7]उपसर्गादनोत्परः ॥ २८ ॥

कृत्यचः ॥ २९ ॥

१ कृत्स्थस्य णत्वे निर्विण्णस्योपसंख्यानम् ।

णेर्विभाषा ॥ ३० ॥

१ णेर्विभाषायां साधनव्यवाय उपसंख्यानम् ।

---

१ प. पुस्तके इतः परमधिकम् । त्र्यक्षरत्र्यक्षरेभ्य इति वक्तव्यम् । रिकादिभ्यः प्रतिषेधो वक्तव्यः । २ अदन्तादन्तस्येति वक्तव्यम् । ३ आहितोपस्थितयोरिति वक्तव्यम् । वाहनं वाह्यादिति वक्तव्यम् । ४ प. पुस्तके नास्ति । ५ प. पुस्तके इतः परमधिकम् । यो वा तस्मादनन्तरः । ६ प. पुस्तके इतः परमधिकम् । साभ्यासस्य द्वयोरिष्टम् । ७ वै. का. नि. प्र पुस्तकेषु एतत्सूत्रम् उपसर्गाद्बहुलमिति । ८ प. पुस्तके इतः परमधिकम् । भाविन्यप्योति नेष्यते ।

२ तद्विधानात्सिद्धम् ।
३ अड्‌धिकाराद्वा ।
हलश्चेजुपधात् ॥ ३१ ॥
इजादेः सनुमः ॥ ३२ ॥
१ सनुमो णत्वेऽवधारणाप्रसिद्धिर्विधेय-भावात् ।
२ सिद्धं तु प्रतिषेधाधिकारे सनुम्ग्रहणात् ।
३ कृत्स्थस्य च णत्वे इजादेः सनुमो ग्रहणम् ।
वा निंसनिक्षनिन्दाम् ॥ ३३ ॥
न भाभूपूकमिगमिप्यायिवेपाम् ॥ ३४ ॥
१ भादिषु पुग्ग्रहणम् ।
२ ण्यन्तस्य चोपसंख्यानम् ।
षात्पदान्तात् ॥ ३५ ॥
१ षात्पदादिपरवचनम् ।
नशेः षान्तस्य ॥ ३६ ॥
१ नशेरशः ।
पदान्तस्य ॥ ३७ ॥
पदव्यवाये ऽपि ॥ ३८ ॥
१ पदव्यवायेऽतद्धिते ।
क्षुभ्नादिषु च ॥ ३९ ॥
स्तोः श्चुना श्चुः ॥ ४० ॥
ष्टुना ष्टुः ॥ ४१ ॥
न पदान्ताट्टोरनाम्[1] ॥ ४२ ॥
तोः षि ॥ ४३ ॥
शात् ॥ ४४ ॥
यरो ऽनुनासिके ऽनुनासिको वा ॥ ४५ ॥
१ यरोऽनुनासिके प्रत्यये भाषायां नित्य-वचनम् ।
अचो रहाभ्यां द्वे ॥ ४६ ॥
अनचि च ॥ ४७ ॥
१ द्विर्वचने यणो मयः ।
२ शरः खयः ।
३ अवसाने च ।
नादिन्याक्रोशे पुत्रस्य ॥ ४८ ॥
१ नादिन्याक्रोशे पुत्रस्येति तत्परे च ।
२ वा हतजग्धपरे च ।
३ चयो द्वितीयाः शरि पौष्करसादेः ।
शरो ऽचि ॥ ४९ ॥
त्रिप्रभृतिषु शाकटायनस्य ॥ ५० ॥
सर्वत्र शाकल्यस्य ॥ ५१ ॥
दीर्घादाचार्याणाम् ॥ ५२ ॥
झलां जश् झशि ॥ ५३ ॥
अभ्यासे चर्च ॥ ५४ ॥
खरि च ॥ ५५ ॥
वावसाने ॥ ५६ ॥
अणो ऽप्रगृह्यस्यानुनासिकः ॥ ५७ ॥
अनुस्वारस्य ययि परसवर्णः ॥ ५८ ॥
वा पदान्तस्य ॥ ५९ ॥
तोर्लि ॥ ६० ॥
उदः स्थास्तम्भोः पूर्वस्य ॥ ६१ ॥
१ उदः पूर्वत्वे स्कन्देश्छन्दस्युपसंख्यानम् ।
झयो हो ऽन्यतरस्याम् ॥ ६२ ॥
शश्छो ऽटि ॥ ६३ ॥
१ छत्वममि तच्छ्लोकेन तच्छ्मश्रुणेति प्रयो-जनम् ।
हलो यमां यमि लोपः ॥ ६४ ॥
झरो झरि सवर्णे ॥ ६५ ॥

१ प. पुस्तके इतः परमधिकम् । अनाम्नवतिनगरीणामिति वक्तव्यम् ।

१ झरो झरि सवर्णग्रहणं समसंख्यप्रतिषेधार्थम् ।

उदात्तादनुदात्तस्य स्वरितः ॥ ६६ ॥

नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ॥ ६७ ॥

अ अ[1] ॥ ६८ ॥

१ अकारस्य प्रत्यापत्तौ दीर्घप्रतिषेधः ।
२ आदेशस्य चानण्त्वान्न सवर्णग्रहणम् ।
३ सिद्धं तु तपरनिर्देशात् ।
४ एकशेषनिर्देशाद्वा स्वरभिन्नानां भगवतः पाणिनेः सिद्धम् ।

॥ समाप्तम् ॥

परिशिष्टवार्तिकानि कैयटाद्युक्तानि ।

अग्रग्रामाभ्यां नयतेर्णो वाच्यः । ३·२·६१.
अर्णसो लोपश्च । ५·२·१०९.
अवर्णान्ताद्वा । ६·३·९७.
अव्ययस्य च्वावीत्वं नेति वाच्यम् । ७·४·३२.
अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया । २·३·२३.
उशनसः संबुद्धौ वानङ् नलोपश्च वा वाच्यः। ७·१·८९.
ऋवर्णादपि । ५·३·८३.
एकाचो नित्यम् । ४·३·१४४.
ओतो णिदिति वाच्यम् । ६·१·९३.
कारके छे च न निषेधः । ६·३·९९.
कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरच् । ५·४·७५.
क्लित्यजादौ वा । ७·२·११४.
गतिकारकेतरपूर्वपदस्य यण् नेष्यते । ६·४·८२.
गम्यमानापि क्रिया कारकविभक्तीनां निमित्तम् । १·४·३१.
गुणकर्मणि वेष्यते । २·३·६५.
झलादाविति वक्तव्यम् । ६·४·३२.
तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्यः । ७·४·५६.
त्यदादीनां फिञ्वा वाच्यः । ४·१·१५६.
त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम् । ४·१·२७.
दोष उपसंख्यानम् । ७·३·५१.
पाशकल्पककाम्येष्विति वाच्यम् । ८·३·३८
मिथोऽनयोः समासे संख्या पूर्वं शब्दपरविप्रतिषेधात् । २·२·३५.
रादेशात्पूर्वविप्रतिषेधेन नुम् । ६·४·४.
वस्त्रात्समाच्छादने । ३·१·२१.
व्रताद्भोजनतन्निवृत्त्योः । ३·१·२१.
शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः । ६·३·१३०.

---

१ वै. का. प्र. पुस्तकेषु सूत्रे इतीत्यधिकम् । २ प. पुस्तके इतः परमाधिकम् । आदेशार्थं सवर्णार्थंमकारो विवृतः स्मृतः । आकारस्य तथा ह्रस्वस्तदर्थं पाणिनेर अ ।

श्वशुरस्योकाराकारलोपश्च । ४·१·६८
संख्याया नदीगोदावरीभ्यां च । ५·४·७५
सनिण्वुलि ल्युटि च न । ६·४·११२
संभ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगः । ८·१·१२
सामान्ये नपुंसकम् । २·४·१७
सृजेः श्रद्धोपपन्ने कर्तर्येव । ३·१·६३
सोपसर्गस्य न । ६·१·२८
हल्यादिभ्यो ग्रहणे । ३·१·२१

॥ समाप्तम् ॥

धातुपाठः ।

१ भू सत्तायाम् ॥ उदात्तः परस्मैभाषः॥ २ एध वृद्धौ । ३ स्पर्ध संघर्षे । ४ गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च । ५ बाधृ लोडने । ६ नाथृ । ७ नाधृ याच्ञोपतापैश्वर्याशीःषु । ८ दध धारणे । ९ स्कुदि आप्रवणे । १० श्विदि श्वैत्ये । ११ वदि अभिवादनस्तुत्योः । १२ भदि कल्याणे सुखे च । १३ मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु । १४ स्पदि किञ्चिच्चलने । १५ क्लिदि परिदेवने । १६ मुद हर्षे । १७ दद दाने । १८ ष्वद १९ स्वर्द आस्वादने । २० उर्द माने क्रीडायां च । २१ कुर्द २२ खुर्द २३ गुर्द २४ गुद क्रीडायामेव । २५ षूद क्षरणे । २६ ह्राद अव्यक्ते शब्दे । २७ ह्लादी सुखे च । २८ स्वाद आस्वादने । २९ पर्द कुत्सिते शब्दे । ३० यती प्रयत्ने । ३१ युतृ ३२ जुतृ भासने । ३३ विथृ ३४ वेथृ याचने । ३५ श्रथि शैथिल्ये । ३६ ग्रथि कौटिल्ये । ३७ कत्थ श्लाघायाम् ॥ एधादय उदात्ता अनुदात्तेत आत्मनेभाषाः॥ ३८ अत सातत्यगमने । ३९ चिती संज्ञाने । ४० च्युतिर् आसेचने । ४१ श्च्युतिर् क्षरणे । ४२ मन्थ विलोडने । ४३ कुथि ४४ पुथि ४५ लुथि ४६ मथि हिंसा-संक्लेशनयोः । ४७ षिध गत्याम् । ४८ षिधू शास्त्रे माङ्गल्ये च । ४९ खाद भक्षणे । ५० खद स्थैर्ये हिंसायां च । ५१ बद स्थैर्ये । ५२ गद व्यक्तायां वाचि । ५३ रद विलेखने । ५४ णद अव्यक्ते शब्दे । ५५ अर्द गतौ याचने च । ५६ नर्द ५७ गर्द शब्दे ५८ तर्द हिंसायाम् । ५९ कर्द कुत्सिते शब्दे । ६० खर्द दन्दशूके । ६१ अति ६२ अदि बन्धने । ६३ इदि परमैश्वर्ये । ६४ विदि

(सूत्रे ५·२·१२८ द्रष्टव्याः)

१४ मरुद्वृधादयः ६·२·१०६·२.

१५ यवखदादयः ५·२·११६·१.

(व्रीह्यादिषु द्रष्टव्याः)

१६ याज्ञवल्क्यादयः ४·२·६६·४.

(याज्ञवल्क्यानि, सौलभानि)

१७ रथकट्यादयः ७·३·४४·३.

१ रथकट्या, गर्गकाम्या ।

१८ रौढ्यादयः ४·१·७९·४.

(के पुनः रौढ्यादयः । ये क्रौड्यादयः ६७)

१९ वतण्ड्यादयः ६·३·३४·४.

२० विश्वजनादयः ६·१·७६·१.

१ विश्वजन, २ नच्छाया ।

२१ वृषलादयः ५·३·६६·३.

१ वृषल, २ दस्यु, ३ चोर ।

२२ वेदाध्यायादयः ३·२·१·१.

१ वेदाध्याय, २ चर्चापार, ३ शमनीपार ।

२३ व्यतीक्षादयः ३·३·४३·४.

१ व्यतीक्षा, २ व्यतीहा ।

२४ शिखादयः ५·२·११६·१.

(व्रीह्यादिषु द्रष्टव्याः)

२५ स्नात्वाकालकादयः ७·१·३४·४.

(मयूरव्यंसकादिषु १७८-४५-४७ द्रष्टव्याः)

वार्तिकस्थ-गणपाठः समाप्तः ।

अन्तर्गण-सूत्राणि ।

(वर्णानुक्रमेण संगृहीतानि । प्रथमः गणस्यानुक्रमाङ्कः द्वितीयो गणान्तर्गतोऽनुक्रमाङ्कः)

अन्तर्गणसूत्राणि समाप्तानि ॥

लिङ्गानुशासनम् ।

१ लिङ्गम् ।

२ स्त्री ।

३ ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः ।

४ अन्यूप्रत्ययान्तो धातुः ।

५ अशनिभरण्यरणयः पुंसि च ।

६ मिन्यन्तः ।

७ वह्निवृष्ण्यग्नयः पुंसि ।

८ श्रोणियोन्यूर्मयः पुंसि च ।

९ क्तिन्नन्तः ।

१० ईकारान्तश्च ।

११ ऊङ्याबन्तश्च ।

१२ य्वन्तमेकाक्षरम् ।

१३ विंशत्यादिरा नवतेः ।

१४ दुन्दुभिरक्षेषु ।

१५ नाभिरक्षत्रिये ।

१६ उभावन्यत्र पुंसि ।

१७ तलन्तः ।

१८ भूमिविद्युत्सरिल्लतावनिताभिधानानि ।

१९ यादो नपुंसकम् ।

२० भास्स्रुक्स्रग्दिगुष्णिगुपानहः ।

२१ स्थूणोर्णे नपुंसके च ।

२२ गृहशशाभ्यां क्लीबे ।

२३ प्रावृड्विप्रुड्रुट्तृट्त्विषः ।

२४ दर्विविदिवेदिखनिशाण्यश्रिवेशिकृ-
ष्योषधिकट्यङ्गुलयः ।

२५ तिथिनाडिरुचिवीचिनालिधूलिकिकि-
केलिच्छविरात्र्यादयः ।

२६ शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रु-
टिवलिपङ्क्तयः ।

२७ प्रतिपदापद्विपत्संपच्छरत्संसत्परिषदु-
षःसंवित्क्षुत्पुन्मुत्समिधः ।

२८ आशीर्धूर्पूर्गीर्द्वारः ।

२९ अप्सुमनस्समासिकतावर्षाणां बहुत्वं
च ।

३० स्रक्त्वग्ज्योग्वाग्यवागूनौस्फिचः ।

३१ तटिसीमासंबध्याः ।

३२ चूलिवेणिखार्यश्च ।

३३ ताराधाराज्योत्स्नादयश्च ।

३४ शलाका स्त्रियां नित्यम् ।

३५ पुमान् ।

३६ घञबन्तः ।

३७ घाजन्तश्च ।

३८ भयलिङ्गभगपदानि नपुंसके ।

---

१ न्यश्रि०

३९ नङन्तः ।

४० याच्ञा स्त्रियाम् ।

४१ क्यन्तो घुः ।

४२ इषुधिः स्त्री च ।

४३ देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि ।

४४ त्रिविष्टपत्रिभुवने नपुंसके ।

४५ द्यौः स्त्रियाम् ।

४६ इषुबाहू स्त्रियां च ।

४७ बाणकाण्डौ नपुंसके च ।

४८ नन्तः ।

४९ क्रतुपुरुषकपोलगुल्फमेघाभिधानानि ।

५० अभ्रं नपुंसकम् ।

५१ उकारान्तः ।

५२ धेनुरज्जुकुहुसरयुतनुरेणुप्रियङ्गवः स्त्रियाम् ।

५३ समासे रज्जुः पुंसि च ।

५४ श्मश्रुजानुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके ।

५५ वसु चार्थवाचि ।

५६ मद्गुमधुशीधुसानुकमण्डलूनि नपुंसके च ।

५७ रुत्वन्तः ।

५८ दारुकसेरुजत्रुवस्तुमस्तूनि नपुंसके ।

५९ सक्तुर्नपुंसके च ।

६० प्राग्रश्मेरकारान्तः ।

६१ कोपधः ।

६२ चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि ।

६३ कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुल्कवर्चस्कपिनाकभाण्डककटकदण्डकपिटकतालकफलककल्कपुलाकानि नपुंसके च ।

६४ टोपधः ।

६५ किरीटमुकुटललाटवटवीटशृङ्गाटकरटलोष्ठानि नपुंसके ।

६६ कुटकूटकपटकपाटकर्पटनटनिकटकीटकटानि नपुंसके च ।

६७ णोपधः ।

६८ ऋणलवणपर्णतोरणरणोष्णानि नपुंसके च ।

६९ कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च ।

७० थोपधः ।

७१ काष्ठपृष्ठरिक्थोक्थानि नपुंसके ।

७२ काष्ठा दिगर्था स्त्रियाम् ।

७३ तीर्थप्रोथयूथगाथानि नपुंसके च ।

७४ नोपधः ।

७५ जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशाानरत्ननिम्नचिह्नानि नपुंसके ।

७६ मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसंमानभवनवसनसंभावनविभावनविमानानि नपुंसके च ।

७७ पोपधः ।

७८ पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके ।

७९ शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च ।

८० भोपधः ।

८१ तलभं नपुंसकम् ।

८२ जृम्भं नपुंसके च ।

८३ मोपधः ।

८४ रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके ।

८५ संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च ।

८६ योपधः ।

८७ किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके ।

८८ गोमयकषायमलयान्वयाव्ययानि नपुंसके च ।

८९ रोपधः ।

९० द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रच्छिद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदरशरीरकन्दरमन्दारपञ्जराजरजठराजिरवैरचामरपुष्करगह्वरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षेत्रक्षत्रमित्रकलत्रच्छत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रास्त्रशस्त्रशास्त्रवस्त्रपत्रपात्रनक्षत्राणि नपुंसके ।

९१ शुक्रमदेवतायाम् ।

९२ चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च ।

९३ षोपधः ।

९४ शिरीषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके ।

९५ यूपकरीषमिषविषवर्षाणि नपुंसके च ।

९६ सोपधः ।

९७ पनसबिसबुससाहसानि नपुंसके ।

९८ चमससरसनिर्यासोपवासकार्पासवासमासकासकांसमांसानि नपुंसके च ।

९९ कंसं चाप्राणिनि ।

१०० रश्मिदिवसाभिधानानि ।

१०१ दीधितिः स्त्रियाम् ।

१०२ दिनाहनी नपुंसके ।

१०३ मानाभिधानानि ।

१०४ द्रोणाढकौ नपुंसके च ।

१०५ खारीमानिके स्त्रियाम् ।

१०६ दाराक्षतलाजासूनां बहुत्वं च ।

१०७ नाड्यपजनोपपदानि व्रणाङ्गपदानि ।

१०८ मरुद्गरुदुत्तरदृत्विजः ।

१०९ ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकपिमुनयः ।

११० ध्वजगजमुञ्जपुञ्जाः ।

१११ हस्तकुन्तान्तवातव्रातदूतधूर्तसूतचूतमुहूर्ताः ।

११२ षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः ।

११३ वंशांशपुरोडाशाः ।

११४ हृदकन्दकुन्दबुद्बुदशब्दाः ।

११५ अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः ।

११६ पल्लवपल्वलकफरेफकटाहानिर्व्यूहमठमणितरङ्गगन्धस्कन्धमृदङ्गसमुद्रपुङ्खाः ।

११७ सारथ्यतिथिकुक्षिवस्तिपाण्यञ्जलयः ।

११८ नपुंसकम् ।

११९ भावे ल्युडन्तः ।

१२० निष्ठा च ।

१२१ त्वष्यञौ तद्धितौ ।

१२२ कर्मणि च ब्राह्मणादिगुणवचनेभ्यः ।

१२३ यद्यढग्यगञण्वुञ्छाश्च भावकर्मणि ।

१२४ द्वन्द्वैकत्वम् ।

१२५ अभाषायां हेमन्तशिशिरावहोरात्रे च ।

१२६ अनञ्कर्मधारयस्तत्पुरुषः ।

१२७ अनल्पे छाया ।

१२८ राजामनुष्यपूर्वा सभा ।

१२९ सुरासेनाच्छायाशालानिशाः स्त्रियां च ।

१३० परवत् ।

१३१ अपथपुण्याहे नपुंसके ।

१३२ संख्यापूर्वा रात्रिः ।

१३३ द्विगुः स्त्रियां च ।

१३४ इसुसन्तः ।

२३५ अर्चिः स्त्रियां च ।

१३६ छदिः स्त्रियामेव ।

१३७ मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि ।

१३८ सीरार्थौदनाः पुंसि ।

१३९ वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च ।

१४० अटवी स्त्रियाम् ।

१४१ लोपधः ।

१४२ तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि ।

१४३ शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालबालनिगलपलालबिडालखिलशूलाः पुंसि च ।

१४४ शतादिः संख्या ।

१४५ शतायुतप्रयुताः पुंसि च ।

१४६ लक्षा कोटिः स्त्रियाम् ।

१४७ सहस्रः पुंसि च ।

१४८ मन्द्व्यच्कोऽकर्तरि ।

१४९ ब्रह्मन्पुंसि च ।

१५० नामरोमणी नपुंसके ।

१५१ असन्तो द्व्यच्कः ।

१५२ अप्सराः स्त्रियाम् ।

१५३ त्रान्तः ।

१५४ यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव ।

१५५ भृत्रामित्रच्छात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः । पुंसि ।

१५६ पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च ।

१५७ बलकुसुमशुल्बयुद्धपत्तनरणाभिधानानि ।

१५८ पद्मकमलोत्पलानि पुंसि च ।

१५९ आहवसङ्ग्रामौ पुंसि ।

१६० आजिः स्त्रियामेव ।

१६१ फलजातिः ।

१६२ वृक्षजातिः स्त्रियामेव ।

१६३ वियज्जगत्सकृत्शकन्पृषच्छकृद्यकृदुदश्वितः ।

१६४ नवनीतावतानृतामृतनिमित्तावित्तपित्तव्रतरजतवृत्तपलितानि ।

१६५ श्राद्धकुलिशदैवपीठकुण्डाङ्गदधिसक्थ्यक्ष्यस्थ्यास्पदाकाशकण्ववीजानि ।

१६६ दैवं पुंसि च ।

१६७ धान्याज्यसस्यरूप्यपण्यवर्ण्यधिष्ण्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि ।

१६८ द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचकवरवृन्दारकाणि ।

१६९ अक्षमिन्द्रिये ।

१७० स्त्रीपुंसयोः ।

१७१ गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमासिमरीचयः ।

१७२ मन्युसीधुकर्कन्धुसिन्धुकण्डूरेणवः ।

१७३ गुणवचनमुकारान्तं नपुंसकं च ।

१७४ अपत्यार्थतद्धिते ।

१७५ पुंनपुंसकयोः ।

१७६ घृतभूतमुस्तक्ष्वेलितैरावतपुस्तबुस्तलोहिताः ।

१७७ शृङ्गार्धनिदाघोद्यमशल्यदृढाः ।

१७८ व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धर्चदर्भपुच्छाः ।

१७९ कबन्धौषधायुधान्ताः ।

१८० दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशाङ्कुशकाशकुशकुलिशाः ।

१८१ गृहमेहदेहपट्टपटहाष्टापदार्बुदककुदाश्च ।

१८२ अवशिष्टलिङ्गम् ।

१८३ अव्ययं कतियुष्मदस्मदः ।

१८४ ष्णान्ता संख्या ।

१८५ गुणवचनं च ।

१८६ कृत्याश्च ।

१८७ करणाधिकरणयोर्ल्युट् ।

१८८ सर्वादीनि सर्वनामानि ।

लिङ्गानुशासनं समाप्तम् ॥

शाकटायनप्रणीतः

उणादिसूत्रपाठः

१ कृवापाजिमिस्वदिसाध्यशूभ्य उण् ।

२ छन्दसीगः ।

३ दृसनिजनिचरिचटिभ्यो ञुण् ।

४ किंजरयोः श्रिणः ।

५ त्रो रश्च लः ।

६ कृके वचः कश्च ।

७ भृमृशीतृचरित्सरितनिधनिमिमास्जिभ्य उः ।

८ अणश्च ।

९ धान्ये नित् । (कटिवटिभ्यां च)

१० शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च ।

११ स्यन्देः संप्रसारणं धश्च ।

१२ उन्देरिच्चादेः ।

१३ ईषेः किच्च ।

१४ स्कन्देः सलोपश्च ।

१५ सृजेरसुम्च ।

१६ कृतेराद्यन्तविपर्ययश्च ।

१७ नावञ्चेः ।

१८ फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च ।

१९ वलेर्गुक्च ।

२० शः कित्सन्वच्च ।

२१ यो द्वे च ।

२२ कुर्भ्रश्च ।

२३ पृभिदिव्यधिगृधिधृषिभ्यः ।

२४ कृग्रोरुच ।

२५ अपदुःसुषु स्थः ।

२६ रपेरिच्चोपधायाः ।

२७ अर्जिदृशिकम्यमिपशिबाधामृजिपशितुग्धुग्दीर्घहकाराश्च ।

२८ प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ।

२९ लङ्घिबंह्योर्नलोपश्च ।

३० ऊर्णोतेर्नुलोपश्च ।

३१ महति ह्रस्वश्च ।

३२ श्लिषेः कश्च ।

३३ आङ्परयोः खनिशृभ्यां डिच्च ।

३४ हरिमितयोर्द्रुवः ।

३५ शते च ।

३६ खरु शङ्कु पीयु नीलङ्गु लिगु ।

३७ मृगय्वादयश्च ।

३८ मन्दिवाशिमथिचतिचङ्कयङ्किभ्य उरच् ।

३९ व्यथेः संप्रसारणं किच्च ।

---

३ अ रहीत्यधिकम् । ९ अ क नास्ति । २३ अ उ. °धृपिदंशिभ्यः । २७ अ °तुग्घुग्दी° । क °पंसि° । उ. °पंशि° २९ अ लघि° । क रङ्घिलङ्घिबंहिभ्यो नलोपश्च । ३६ क °लिग्वङ्गुपङ्गुहिङ्गुशवः । ३९ अ व्यथेः संप्रसारणं धः किच्च ।

४० मुकुरदर्दुरौ ।

४१ मद्गुरादयश्च ।

४२ असेरुरन् ।

४३ मसेश्च ।

४४ शावशेराप्तौ ।

४५ अविमह्योष्टिषच् ।

४६ अमेर्दीर्घश्च ।

४७ रुहेर्वृद्धिश्च ।

४८ तवेर्णिद्वा ।

४९ नञि व्ययेः ।

५० किलेर्बुक्च ।

५१ इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच् ।

५२ अशेर्णित् ।

५४ अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः ।

५४ सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच् ।

५५ कमेः पश्च ।

५६ गुपादिभ्यः कित् ।

५७ मिथिलादयश्च ।

५८ पतिकठिकुठिगडिगुडिदंशिभ्यः एरक् ।

५९ कुम्बेर्नलोपश्च ।

६० शदेस्त च ।

६१ मूलेरादयः ।

६२ कबेरोतच्पश्च ।

६३ भातेर्डवतुः ।

६४ कठिचकिभ्यामोरन् ।

६५ किशोरादयश्च ।

६६ कपिगडिगण्डिकटिपटिभ्य ओलच् ।

६७ मीनातेरूरन् ।

६८ स्यन्देः संप्रसारणं च ।

६९ सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् ।

७० पः किच्च ।

७१ अर्तेश्च तुः ।

७२ कमिमनिजनिगाभायाहिभ्यश्च ।

७३ चायः किः ।

७४ आप्नोतेर्ह्रस्वश्च ।

७५ वसेस्तुन् ।

७६ अगारे णिच्च ।

७७ कृञः क्तुः ।

७८ एधिवह्योश्च तुः ।

---

४० अ उ मकुर° क मकुरदुर्दुरौ च । ४१ अ क नास्ति । ५१ अ क महीत्यधिकम् । ५२ अ क अशेर्निच्च । ५४ क भडि° इत्यस्य स्थाने °भटि° इति, ०चण्डि° इत्यधिकम् । ५५ अ कवेःपश्च० । क कपेश्च । ५६–६३ गुपादिसूत्रादारभ्यैतत्सूत्रं यावत्सप्तसूत्राणि केषांचिदसंमतानीति उज्ज्वलदत्तः ॥ ५८ क पथिकाथि° इति वर्णान्तरम् । ५९ उ. कुन्वे° । ६१ क °यश्च । ६२–६३ अ क न स्तः। ६३ उ. °तुप् ६४ अ क °मोरच् । ६६ अ गण्डि इत्यस्य स्थाने कडि इति । क °गाडि° इत्यस्य स्थाने °काडि° इति । चकारो न विद्यते । ६७–६८ अ क सूत्रद्वयं न विद्यते । इतपरं 'बहुलमन्यत्रापि । इत्यधिकं सूत्रम् । ७० अ क इतः परं 'मीनातेरूरन्' इति सूत्रमधिकम् । ७१ क चकारो न विद्यते । ७२ क °पा° इत्यधिकम् । ७३ अ अस्मिन् सूत्रे चकारोऽधिकः । ७५ अ वसस्तुन् ।

७९ जीवेरातुः ।
८० आतृकन्वृद्धिश्च ।
८१ कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः ।
८२ मृजेर्गुणश्च ।
८३ वहो धश्च ।
८४ कषेश्छश्च ।
८५ णित्कसिपद्यर्थेः ।
८६ अणो डश्च ।
८७ नञि लम्बेर्नलोपश्च ।
८८ के श्र एरङ् चास्य ।
८९ त्रो दुट् च ।
९०- दरिद्रातेर्यालोपश्च ।
९१ नृतिशृध्योः कूः ।
९२ ऋतेरम्च ।
९३ अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः ।
९४ मृग्रोरुतिः ।
९५ ग्रो मुट् च ।
९६ हृषेरुलच् ।
९७ हृसृरुहियुषिभ्य इतिः ।
९८ ताडेर्णिलुक् च ।
९९ शमेर्ढः ।
१०० कमेरठः ।
१०१ रमेर्वृद्धिश्च ।
१०२ शमेः खः ।
१०३ कणेष्ठः ।
१०४ कलस्तृपश्च ।
१०५ शपेर्वश्च ।
१०६ वृषादिभ्यश्चित् ।
१०७ मृजेष्टिलोपश्च ।
१०८ चुपेरच्चोपधायाः ।
१०९ शाकिशम्योर्नित् ।
११० छो गुक् ह्रस्वश्च ।
१११ ञमन्ताड्डः ।
११२ क्वादिभ्यः कित् ।
११३ स्थाचतिमृजेरालज्वालञालीयचः ।
११४ पतिचण्डिभ्यामालञ् ।
११५ तमिविशिबिडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन् ।
११६ पतेरङ्गच्पक्षिणि ।
११७ तरत्यादिभ्यश्च ।
११८ विडादिभ्यः कित् ।
११९ सृपृञोर्वृद्धिश्च ।
१२० गन्गम्यद्योः ।
१२१ छापूखडिभ्यः कित् ।
१२२ भृञः किन्नुट् च ।
१२३ शृणातेर्ह्रस्वश्च ।
१२४ गणशकुनौ ।
१२५ मुदिग्रोर्गग्गौ ।

८२ अ क इतः परमधिकं सूत्रम् खडेश्च । उ. खडेर्डुव । इदं सूत्रं न संमतं सर्वत्रेति उज्वलदत्तः । ८३ अ उ. वहेर्धश्च । ९१ अ वृतिशृध्योः कू । ९३ उ. °दन्कू° °जम्बूकम्बू° दिधिषु । ९५ अ क गमुट् च । ९८ अ तारेर्णिलुक् च । ९९ अ शणेर्ढः । क पणेर्डः । १०१–१०३ अ न सन्ति । १०९ अ इतः-परमधिके सूत्रे भ्रमिमस्योरुच्चोपधायाः । कणेष्ठः । क एतस्मात् सूत्रद्वयात् 'कम्बलादयश्च' इत्यधिकम् । ११० क नास्ति । ११३ अ °लीयरः । क °लया° ११५ अ क नास्ति । ११६ अ इतः परं सर्तेर्णित् । गन्गम्यदेः । इति सूत्रद्वयमधिकम् । ११७–१२१ अ न सन्ति । १२१ क नास्ति । १२५ अ मुदिग्रोर्गद्गौ ।

१२६ अण्डन्कृसृभृवृञः ।
१२७ शृदृभसोऽदिः ।
१२८ दृणातेः पुक् ह्रस्वश्च ।
१२९ त्यजितनियजिभ्यो डित् ।
१३० एतेस्तुट् च ।
१३१ सर्तेरटिः ।
१३२ लङ्घेर्नलोपश्च ।
१३३ पारयतेरजिः ।
१३४ प्रथः कित्संप्रसारणं च ।
१३५ भियः पुक् ह्रस्वश्च ।
१३६ युष्यसिभ्यां मदिक् ।
१३७ अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदिय-
क्षिनीभ्यो मन् ।
१३८ जहातेः सन्वदालोपश्च ।
१३९ अवतेष्टिलोपश्च ।
१४० ग्रसेरा च ।
१४१ अविसिविसिशुषिभ्यः कित् ।
१४२ इषियुधीन्धिदासिश्याधूसूभ्यो मक् ।
१४३ युजिरुचितिजां कुश्च ।
१४४ हन्तेर्हि च ।
१४५ भियः षुग्वा ।
१४६ घर्मः ।
१४७ ग्रीष्मः ।
१४८ प्रथेः षिवन्संप्रसारणं च ।
१४९ अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् ।
१५० इण्शीभ्यां वण् ।
१५१ सर्वनीघृष्वरिष्वलष्वशिवपट्वप्रह्वेष्वा
अस्वतन्त्रे ।
१५२ शेवयह्वजिह्वाग्रीवाप्वामीवाः ।
१५३ कृगृशृदृभ्यो वः ।
१५४ कनिन् युवृषितक्षिराजिधन्विद्युप्रति-
दिवः ।
१५५ सप्यशूभ्यां तुट् च ।
१५६ नञि जहातेः ।
१५७ श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्ज-
न्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघ-
वन्निति ॥
इत्युणादिषु प्रथमः पादः ॥

---

१५८ कृहृभ्यामेणुः ।
१५९ हनिकुषिनीरमिकाशिभ्यः क्थन् ।
१६० अवे भृञः ।
१६१ उषिकुषिगार्तिभ्यस्थन् ।
१६२ सर्तेर्णित् ।

---

१२८ अ इतः परमधिकं सूत्रद्वयम् । तथाहि- एतेस्तुट् च । त्विपिमिपिभ्यां च । १३०. अ अत्रत्यमुपरि वर्तते । १३३ अ क उ. पारेरजिः । १३४–१३६ न सन्ति । १२६ क नास्ति । १३७ अ क °वा° इति न विद्यते । १३८ क नास्ति । १४० ग्रसतेरा च । उ. °रात् । १४१° सि° न विद्यते । १४३ अ क कुत्वं चेति । १४४ उ. हनेर्हि च । १४६–१४७ क सूत्रद्वयोरैक्यम् । १५० उ. वन् । १५१ अ सर्वनिघृष्वर्श्वलष्वशिवपट्वप्रह्वेष्वा अतन्त्रे इति पाठः । क- °लष्वप्रह्वेष्वा अतन्त्रे । उ. अतन्त्रे । १५२ अ क शेवायह्वा° । १५४ इतःपरं 'पञ्चेश्च' इत्यधिकं सूत्रम् । १५५ उ. नास्ति । १५६ अ नास्ति । इतःपरमाधिकं सूत्रद्वयम्- नुदंशेगुणश्च । सहेःपप् लुक् च । १६१ क °गार्तिकनिभ्य° । १६२ अ अत्रत्यमर्तेर्णिरी(१६५) त्यस्याग्रे दृश्यते । उ. णिच्च ।

१६३ जॄवृञ्भ्यामूथन् ।
१६४ पातॄतुदिवचिरिचिसिचिभ्यस्थक् ।
१६५ अर्तेर्निरि ।
१६६ निशीथगोपीथावगथाः ।
१६७ गश्चोदि । २·१०
१६८ सर्माणः ।
१६९ तिथपृष्ठगूथयूथप्रोथाः ।
१७० स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमन्दिचन्दिदहिदसिदम्भिवासिवाशिशीङ्हासिसिधिशुभिभ्यो रक् ।
१७१ चकिरम्योरुच्चोपधायाः ।
१७२ वौ कसेः ।
१७३ अमितम्योर्दीर्घश्च ।
१७४ निन्देर्नलोपश्च ।
१७५ अर्देर्दीर्घश्च ।
१७६ शुचेर्दश्च ।
१७७ दुरीणो लोपश्च । २·२०
१७८ कृतेश्छः क्रू च ।
१७९ रोदेर्णिलुक् च ।
१८० बहुलमन्यत्रापि संज्ञाछन्दसोः ।
१८१ जोरी च ।
१८२ सुसूधागृधिभ्यः क्रन् ।
१८३ शुसिचिमीनां दीर्घश्च ।
१८४ वा विन्धेः ।
१८५ वृधिवपिभ्यां रन् ।
१८६ ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवन्रेरामालाः ।
१८७ समि कसे उकन् । २·३०
१८८ पचिनशोर्णुकन्कनुमौ च ।
१८९ भियः क्रुकन् ।
१९० क्रुन्शिलिपसंज्ञयोरपूर्वस्यापि ।
१९१ रमे रश्च लो वा ।
१९२ जहातेर्द्वे च ।
१९३ ध्मो धम च ।
१९४ हनो वध च ।
१९५ बहुलमन्यत्रापि ।
१९६ कृषेर्वृद्धिश्चोदीचाम् ।
१९७ उदकं च । २·४०
१९८ वृश्चिकृषोः किकन् ।
१९९ प्राङि पणिकषः ।
२०० मुषेर्दीर्घश्च ।
२०१ स्यमेः संप्रसारणं च ।
२०२ क्रिय इकन् ।
२०३ आङि पणिपनिपतिखनिभ्यः ।
२०४ श्यास्त्याह्वञविभ्य इनच् ।
२०५ वृजेः किच्च ।

१६९ क °कुथ° इत्यधिकम् । १७० क °वासि° इत्यस्य स्थाने °वाासि° अ क इतः परं निन्देर्नलोपश्च, तमेर्दुकुच, चकिरम्योरुच्चोपधायाः, वौ कसेः, शदेरू च, स्थश्च, अमितम्योर्दीर्घश्च, शुचेर्दश्च, इति व्युत्क्रमेण सूत्राणि सन्ति । तत्र तमेर्दुक् च । शदेरू च । स्थश्च इति सूत्राणि अधिकानि । १७१ अ क न विद्यते । १८० उ. नास्ति । १८२ उ. °धाञ्गृ° । १८६ अ क °कुम्रचुम्र° °वर्णेरामालाः । १८७ अ क सामि कस उकन् । १८८ अ पचिनश्योर्णु° । १९१ अ क नास्ति । १९७ न क 'च' न विद्यते । १९८ अ क कुपीत्यधिकम् ।

२०६ अजेरज च ।
२०७ बहुलमन्यत्रापि । २.५०
२०८ द्रुदक्षिभ्यामिनन् ।
२०९ अर्तेः किदिच्च ।
२१० वेपितुह्योर्ह्रस्वश्च ।
२११ तलिपुलिभ्यां च ।
२१२ गर्वेरत उच्च ।
२१३ रुहेश्च ।
२१४ महेरिनण्च ।
२१५ क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं च ।
२१६ आप्नोतेर्ह्रस्वश्च ।
२१७ परौ व्रजेः षः पदान्ते । २.६०
२१८ हुवः श्लुवच्च ।
२१९ स्रुवः कः ।
२२० चिक्च ।
२२१ तनोतेरनश्च वः ।
२२२ ग्लानुदिभ्यां डौः ।
२२३ व्विरव्ययम् ।
२२४ रातेर्डैः ।
२२५ गमेर्डोः ।
२२६ भ्रमेश्च डूः ।
२२७ दमेर्डोसिः । २.७०
२२८ पणेरिज्यादेश्च वः ।
२२९ वशेः कित् ।
२३० भृञ उच्च ।
२३१ जसिसहोरुरिन् ।
२३२ सुयुरुवृञो युच् ।
२३३ अशे रश च ।
२३४ उन्देर्नलोपश्च ।
२३५ गमेर्गश्च ।
२३६ बहुलमन्यत्रापि ।
२३७ रञ्जेः क्युन् । २.८०
२३८ भूसूधूभ्रस्जिभ्यश्छन्दसि ।
२३९ कृपृवृजिमन्दिनिधाञः क्युः ।
२४० धृषेर्धिष् च संज्ञायाम् ।
२४१ वर्तमाने पृषद्बृहन्महज्जगच्छतृवत् ।
२४२ संश्चत्तृपद्वेहत् ।
२४३ छन्दस्यसानच्शुजृभ्याम् ।
२४४ ऋञ्जिवृधिमन्दिसहिभ्यः कित् ।
२४५ अर्तेर्गुणः शुट् च ।
२४६ सम्यानच्स्तुवः ।
२४७ युधिवुधिदृशिभ्यः किच्च । २.९०

२०८ अ क इतः परं द्रुहेः कित् इति । २०९ अ क अर्तेरिच्च । २१०-२१३ अ क न विद्यन्ते । २१५ अ क °कटप्रुज्वां- । २१७ उ. षश्च । २१८ अ द्युतिदृणातेर्ह्रस्वश्च इत्यधिकम् । क द्याति० । २१९ अ क स्रुवः कन् २२२ क -डो । २२४ अ क रतेर्डैः इत्यस्य स्थाने रातेर्डैः । २२६ क भ्रमेर्डू । २२७ दमेर्डोस् । २२९ अ क वशः कित् । २३० कौमुद्यामूच्चेति पाठः । २३५ अ क न विद्यते । २३९ अ °वृजि° इत्यस्य स्थाने °व्राजि° । अ क °धाञ्भ्यः । २४० अ इतः परं हन्तेर्घुर च इत्यधिकम् । क इतः परं हन्तेर्घुरच् । गमेर्गग च । सूत्रद्वयमधिकम् । उ. इतः परं हन्तेर्घुरश्चेत्यधिकम् । २४१ अ उ. °वच्च । २४३ अ क °च्शवजृ° । २४७ अ क युधि° इत्यस्य स्थाने युजि° इति । इतःपरमधिकं सूत्रद्वयम् । पपेर्णिच्च । मुचियुधिभ्यां सन्वच्च । उ. °दृशः ।

२४८ हुर्छेः सनो लुक् छलोपश्च ।
२४९ श्वितेर्दश्च ।
२५० तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ ।
२५१ बहुलमन्यत्रापि ।
२५२ नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।
२५३ सावसेर्ऋन् ।
२५४ यतेर्वृद्धिश्च ।
२५५ नञि च नन्देः ।
२५६ दिवेर्ऋः ।
२५७ नयतेर्डिच्च । २·१००
२५८ सव्ये स्थश्छन्दसि ।
२५९ अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः ।
२६० आङि शुषेः सनश्छन्दसि ।
२६१ कृषेरादेश्च दः ।
२६२ अदेर्मुट् च ।
२६३ वृतेश्च ।
२६४ क्षिपेः किच्च ।
२६५ अर्चिशुचिहुसृपिच्छादिछर्दिभ्य इसिः ।
२६६ बृंहेर्नलोपश्च ।
२६७ द्युतेरिसिन्नादेश्च जः । २·११०
२६८ वसौ रुचेः संज्ञायाम् ।
२६९ भुवः कित् ।
२७० सहो धश्च ।
२७१ पिबतेस्थुक् ।
२७२ जनेरुसिः ।
२७३ मनेर्धश्छन्दसि ।
२७४ अर्तिपॄवपियजितनिधनितपिभ्यो नित् ।
२७५ एतेर्णिच्च ।
२७६ चक्षेः शिच्च ।
२७७ मुहेः किच्च । २·१२०
२७८ बहुलमन्यत्रापि ।
२७९ कृगॄशॄवृचतिभ्यः ष्वरच् ।
२८० नौ सदेः ।

इत्युणादिषु द्वितीयः पादः ॥

---

२८१ छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः ।
२८२ इण्षिञ्जिदीङुष्यविभ्यो नक् ।
२८३ फेनमीनौ ।
२८४ कृषेर्वर्णे ।
२८५ बन्धेर्ब्रधिबुधी च ।
२८६ धापॄवस्यज्यतिभ्यो नः ।
२८७ लक्षेरट् च ।
२८८ वनेरिच्चोपधायाः ।
२८९ सिवेष्टेयू च ।

---

२५० क शंसिशासिशासिदसिक्षदादिभ्यः । २५२ क °क्षत्तृ° इत्यधिकम् । २५३ क उ. सुञ्यसेः ऋन् । २५९ अ °धम्यश्यवतॄभ्योऽनिः । २६१ अ कौ. °श्च चः । २६५ क °छृदिछादिभ्य– । २७० क सहेर्ध च । उ. सहेर्धश्च । २७१ अ उ. °स्थुक् च । २७४ अ क °तपिभ्यं इत्यस्य स्थाने °त्रपिभ्य । इतः परमधिकं सूत्रम् । मेऽदः । २७९ क °वृ° स्थाने °पॄ° इति । २८८ अ क पणे° ।

२९० कृवृजॄषिद्रुपन्यनिस्वापिभ्यो नित् ।
२९१ धेट इच्च । ३·११
२९२ तृषिशुषिरसिभ्यः कित् ।
२९३ सुञो दीर्घश्च ।
२९४ रमेस्त च ।
२९५ रास्नासास्नास्थूणावीणाः ।
२९६ गादाभ्यामिष्णुच् ।
२९७ कृत्यशूभ्यां क्स्नः ।
२९८ तिजेर्दीर्घश्च ।
२९९ श्लिषेरच्चोपधायाः ।
३०० यजिमनिशुन्धिदसिजनिभ्यो युच् ।
३०१ भुजिमृङ्भ्यां युक्त्युकौ । ३·२१
३०२ सर्तेरयुः ।
३०३ पानीविपिभ्यः पः ।
३०४ च्युवः किच्च ।
३०५ स्तुवो दीर्घश्च ।
३०६ पुशृभ्यां निच्च ।
३०७ कुयुभ्यां च ।
३०८ खष्पाशिल्पशष्पवाष्परूपपर्पतल्पाः ।
३०९ स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच् ।
३१० कृहनिभ्यां क्तुः । ३·३०
३११ गमेः सन्वच्च ।
३१२ दाभाभ्यां नुः ।
३१३ वचेर्गश्च ।
३१४ धेट इच्च ।
३१५ सुवः कित् ।
३१६ जहातेर्द्वे ऽन्तलोपश्च ।
३१७ स्थो णुः ।
३१८ अजिवृरीभ्यो निच्च ।
३१९ विषेः किच्च ।
३२० कृदाधारार्चिकलिभ्यः कः । ३·४०
३२१ सृवृभूशुषिमुषिभ्यः कक् ।
३२२ शुकवल्कोल्काः ।
३२३ इण्भीकापाशल्यतिमर्चिभ्यः कन् ।
३२४ नौ हः ।
३२५ नौ सदेर्डिच्च ।
३२६ स्यमेरीट् च ।
३२७ अजियुधूनीभ्यो दीर्घश्च ।
३२८ ह्रियो रश्च लो वा ।
३२९ शकेरुनोन्तोन्त्युनयः ।
३३० भुवो झिच् । ३·५०
३३१ कन्युच्क्षिपेश्च ।
३३२ अनुङ् नदेश्च ।
३३३ कृवृदारिभ्य उनन् ।
३३४ त्रो रश्च लो वा ।
३३५ क्षुधिपिशिमिथिभ्यः कित् ।
३३६ फलेर्गुक्च ।
३३७ अशेर्लेशश्च ।
३३८ अर्जेर्णिलुक्च ।
३३९ तृणाख्यायां चित् ।

३०० अ युच् इत्यस्य स्थाने युः । ३०४ अ क च्युवः किद्दीर्घश्च । अ इतःपरमाधिकम्-स्त्यस्संप्रसारणमुश्च ।क °मूश्च । ३०५ एतत्सूत्रं सतीवृत्तौ न दृश्यते । सर्वस्वे तु स्त्येधातोः स्तूपमिति साधितम् । अत इदमनार्षमिति लक्ष्यते । इति उज्वलदत्तः । ३०८ अ °शिल्प° इत्यस्य °शिष्प° इति । ३१६ अ जहातेर्द्वे च लोपश्च । ३१७ अ स्थाणुः । ३१८ अ क-नित् । ३२१ अ क-कित् । ३२५ अ क नास्ति । ३२६ अ क स्यम ईट् च । ३३१ अ क्षिपेः । ३३२ अ क चतुङ नुदेश्च । ३३३ अ कृतृदारिभ्यः-। ३३५ उ. °मिथः। ३३६ अ कं नास्ति ॥

३४० अर्तेश्च । ३·६०
३४१ अजियमिशीङ्भ्यश्च ।
३४२ वृतॄवदिहानिकमिकषिभ्यः सः ।
३४३ प्लुषेरच्चोपधायाः ।
३४४ मनेर्दीर्घश्च ।
३४५ अशेर्देवने ।
३४६ स्नुव्रश्चिकृत्यृषिभ्यः कित् ।
३४७ ऋषेर्जातौ ।
३४८ उन्दिगुधिकुषिभ्यश्च ।
३४९ गृधिपण्योर्दकौ च ।
३५० अशेः सरः । ३·७०
३५१ वसेश्च ।
३५२ संपूर्वाच्चित् ।
३५३ कृधूमदिभ्यः कित् ।
३५४ पते रश्च लः ।
३५५ तन्यृषिभ्यां क्सरन् ।
३५६ पीयुक्वणिभ्यां कालन्ह्रस्वः संप्रसारणं च ।
३५७ कठिकषिभ्यां काकुः ।
३५८ सर्तेर्दुक्च ।
३५९ वृतेर्वृद्धिश्च ।
३६० पर्देर्नित्संप्रसारणमल्लोपश्च । ३·८०
३६१ सृयुवचिभ्योऽन्युजागूजक्नुचः ।
३६२ आनकः शीङ्भियः ।
३६३ आणको लुधूशिङ्घिधाञ्भ्यः ।
३६४ उल्मुकदर्विहोमिनः ।
३६५ ह्रियः कुक्रश्च लो वा ।
३६६ हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन् ।
३६७ नञ्याप इट् च ।
३६८ तनिमृङ्भ्यां किच्च ।
३६९ अञ्जिघृसिभ्यः क्तः ।
३७० दुतनिभ्यां दीर्घश्च । ३·९०
३७१ जेर्मूट् चोदात्तः ।
३७२ लोष्टपलितौ ।
३७३ ह्रयाभ्यामितन् ।
३७४ रुहे रश्च लो वा ।
३७५ पिशेः किच्च ।
३७६ श्रुदक्षिस्पृहिगृहिभ्य आय्यः ।
३७७ दधिषाय्यः ।
३७८ वृञ एण्यः ।
३७९ स्तुवः क्सेय्यश्छन्दसि ।
३८० राजेरन्यः । ३·१००

३४० अ क इतःपरं 'धारोर्णिलुक् च' इत्यधिकम् । ३४२ क °युमुचिभ्यः इत्यधिकम् । ३४३ अ नास्ति । ३४५ क इतःपरं नदेः कश्चेत्यधिकम् । ३४७ अ क इतःपरमधिकानि सूत्राणि । अर्तेर्भुक्षिन् (भुक्षिनक्) । मघेरच् नलोपश्च (मङ्घेरच् लोपश्च) । स्तनेर्डलः । गविगन्धृङो (धृञो) वः । दम्भेः सकिन् मक् च (दम्भेस्सिन् मक् च) । (दमेरुभिद्धुगुश्चोपधायाः) ।दिवेर्दिवि (दिवेर्डिवः) । ३४८ अ नास्ति । क उन्देर्नलोपश्च । ३४९ अ गृधिपत्योर्दकौ च । ३५० क उ.– सरन् । ३५२ क सपूर्वाच्चित् । ३५४ अ क लो वा । ३५६ अ वीयुकणिभ्यां– । ३५७ अ कठिकुपिभ्यां फारुः । क कुटिकुपिभ्यां फाकुः । इतःपरं चटिकटिभ्यामाकुरित्यधिकम् । ३५९ अ क नास्ति । ३६० अ °र्नित्मसारण° । ३६१ अ– °जग्नुचः । ३६२ अ आनकन्– । ३६३ अ आनकच् लूशिङ्घि° । क नास्ति । ३६५ अ क –कुमश्च– । ३६६ क °ण्वामि° । ३६७ अ नञ्याप्नोतेरिट् च । ३७१ अ नास्ति । ३७५ अ क नास्ति । ३७६ अ क गृहि इति न विद्यते । ३७८ अ–एण्यन् । ३७९ अ क–क्षेय्य । उ. –केय्यः– ।

३८१ शृरम्योश्च ।

३८२ अर्तेर्निश्च ।

३८३ पर्जन्यः ।

३८४ वदेरान्यः ।

३८५ अमिनक्षियजिवधिपतिभ्योऽत्रन् ।

३८६ गडेरादेश्च कः ।

३८७ वृञश्चित् ।

३८८ सुविदेः कत्रन् ।

३८९ कृतेर्नुम्च ।

३९० भृमृदशियजिपर्विपच्यमितमिनमिहर्येभ्योऽतच् । ३·११०

३९१ पृषिरञ्जिभ्यां कित् ।

३९२ खलतिः ।

३९३ शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः ।

३९४ भृञश्चित् ।

३९५ रुविदिभ्यां ङित् ।

३९६ उपसर्गे वसेः ।

३९७ अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच् ।

३९८ वेञस्तुट् च ।

३९९ वहियुभ्यां णित् ।

४०० वयश्च ।

४०१ दिवः कित् । ३·१२०

४०२ कृशृशलिकलिगर्दिभ्योऽभच् ।

४०३ ऋपिवृषिभ्यां कित् ।

४०४ रुपेर्निल्लुप्च ।

४०५ रासिवल्लिभ्यां च ।

४०६ जृविशिभ्यां झच् ।

४०७ रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि ।

४०८ तृभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च ।

४०९ हन्तेर्मुट् हि च ।

४१० भन्देर्नलोपश्च । ३·१३०

४११ ऋच्छेररः ।

४१२ अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चित् ।

४१३ कुवः क्ररन् ।

४१४ अङ्गिमदिमन्दिभ्य आरन् ।

४१५ गडेः कड् च ।

४१६ शृङ्गारभृङ्गारौ ।

---

३८१ अ क नास्ति । ३८५ अ °यजिवन्धिपतिभ्यः– । ३८६ अ क गलेरा° । ३८८ अ क सुजिविदेः कत्रन् । ३९० अ °भृमृद° । अ क °तमि° इति न विद्यते । ३९२ अ क खलतः । ३९३ अ इतः परमधिकम् । दशिशामिदमिभ्यश्च । ३९४ अ क भृञश्चित् इत्यादि सूत्रचतुष्टयं व्युत्क्रमेण । ३९५ क–कित् । ३९७ अ अत्यमिचामितमिरभिनभितपिपनिभ्योऽसच् । ३९८ अ इतः परमाधिकं सूत्रं 'वयो णित्' इति । ३९९ अ वह्यियुभ्यां च । क वाहसः । ४०० अ क वयो णित् । ४०१ अ क दिविशिविभ्यां किच्च । ४०२ अ क कृगृशृशल(लि)गार्दिभ्योऽभच् । ४०४ अ क रुपोर्निलुश्च । क रुपेर्नित् लुश् च । ४१२ अ क °वाशि° इति आधिकम् । अ देवि इत्यस्य स्थाने दिवि । ४१३ अ कुवः कुरन् । उ. क्ररन् । ४१५ अ गडेः कट च । क गलेः कट च ।

४१७ काञ्जिमृजिभ्यां चित् ।
४१८ कमेः किदुच्चोपधायाः ।
४१९ तुषारादयश्च ।
४२० दीङो नुट् च । ३·१४०
४२१ सर्तेरपः षुक्च ।
४२२ उषिकुटिदलिकचिखजिभ्यः कपन् ।
४२३ क्वणेः संप्रसारणं च ।
४२४ कपश्चाक्रवर्मणस्य ।
४२५ विटपपिष्टपविशिपोलपाः ।
४२६ वृतोस्तिकन् ।
४२७ कृतिभिदिलतिभ्यः कित् ।
४२८ इष्यशिभ्यां तकन् ।
४२९ इणस्तशन्तशसुनौ ।
४३० वीपतिभ्यां तनन् । ३·१५०
४३१ दृदलिभ्यां भः ।
४३२ अर्तिगृभ्यां भन् ।
४३३ इणः कित् ।
४३४ असिसञ्जिभ्यां क्थिन् ।
४३५ प्लुषिकुषिशुषिभ्यः क्सिः ।
४३६ अशेर्नित् ।
४३७ इषेः क्सुः ।
४३८ अवितृस्तृतन्त्रिभ्य ईः ।
४३९ यापोः किद् द्वे च ।
४४० लक्षेर्मुट् च । ३·१६०

इत्युणादिषु तृतीयः पादः ।

---

४४१ वातप्रमीः ।
४४२ ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्यः कत्निज्यतुजालिजिष्ठुजिष्ठजिसन्स्यनिथिनुल्यसासानुकः ।
४४३ श्रः करन् ।
४४४ पुषः कित् ।
४४५ कलश्च ।
४४६ गमेरिनिः ।
४४७ आङि णित् ।
४४८ भुवश्च ।
४४९ प्रे स्थः ।
४५० परमे कित् । ४·१०
४५१ मन्थः ।
४५२ पतस्थ च ।
४५३ खजेराकः ।
४५४ बलाकादयश्च ।
४५५ पिनाकादयश्च ।
४५६ कपिदूषिभ्यामीकन् ।

---

४१७ अ काजि° । ४१८ अ क क्रमेरुच्चो° । ४२० अ क नास्ति । अत्र उज्वलदत्तः— 'सूत्रमिदं सतीवृत्तौ देववृत्तौ च न दृश्यते' । दीनारशब्दो भोजेन तुषारादौ समावेशितः इति प्रक्रियासर्वस्वे । ४२४ अ कपंश्चा° क कवश्चा° । ४२९ अ क इणस्तशंस्त° । ४३७ अ इष्यशूभ्यां क्सुः । क इष्यशिभ्यां क्सुः । ४४० अ इतः परमधिकं सूत्रम् । चुष्यसिभ्यां मदिक् । ४४२ अ °वन्यजर्पि° °कृशिभ्यः अत्निय° °ष्टुजिष्णुजिशन् स्यन्निथिन्नुल्यशासानुकः । क–अत्निच्° । ४४५ क कलच् च उ. कलंश्च । ४५१ अ मन्थेः । क मथेः । ४५२ क पतेः स्थ च । ४५३ अ खजेराकः । ४५४ अ क इतःपरम् शलिपटिपतिभ्यो नित् इत्यधिकम् ।

४५७ अनिदृपिभ्यां किच्च ।
४५८ चङ्कणः कङ्कणश्च ।
४५९ शॄपॄवॄञां द्वे रुक्चाभ्यासस्य ।
४६० फर्फरीकादयश्च । ४·२०
४६१ ईपेः किद्ध्रस्वश्च ।
४६२ ऋजेश्च ।
४६३ सर्तेर्नुम्च ।
४६४ मृडः कीकन्कङ्कणौ ।
४६५ अलीकादयश्च ।
४६६ कॄतॄभ्यामीपन् ।
४६७ शॄपॄभ्यां किच्च ।
४६८ अर्जेर्ऋज च ।
४६९ अम्बरीषः ।
४७० कॄशॄपॄकटिपटिशौटिभ्य ईरन् । ४·३०
४७१ वशेः कित् ।
४७२ कशेर्मुट् च ।
४७३ कृञ उच्च ।
४७४ घसेः किच्च ।
४७५ गभीरगम्भीरौ ।
४७६ विषा विहा ।
४७७ पच एलिमच् ।
४७८ शीङो धुक्लक्वलञ्वालनः ।
४७९ मृकणिभ्यामूकोकणौ ।
४८० वलेरूकः । ४·४०
४८१ उलूकादयश्च ।
४८२ शलिमण्डिभ्यामूकण् ।
४८३ नियो मिः ।
४८४ अर्तेरूच्च ।
४८५ भुवः कित् ।
४८६ अश्नोते रश्च ।
४८७ दलिमः ।
४८८ वीज्याज्वरिभ्यो निः ।
४८९ सृवृपिभ्यां कित् ।
४९० अङ्गेर्नलोपश्च । ४·५०
४९१ वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् ।
४९२ घृणिपृश्निपार्ष्णिचूर्णिभूर्णि ।
४९३ वृदॄभ्यां विन् ।
४९४ जॄशॄस्तॄजागृभ्यः क्विन् ।
४९५ दिवो द्वे दीर्घश्चाभ्यासस्य ।
४९६ कृविघृष्विछविस्थविकिकीदिवि ।
४९७ पतेर्डतिः ।
४९८ शकेर्ऋतिन् ।

---

४५७ अ क नास्ति । ४५८ अ चङ्कण्यतेः कङ्कण च । क चङ्कण्यते किङ्किण च । ४५९ अ °वृङां ४६० अ इतः परमधिकं सूत्रम् । अनिदृशिभ्यामीकन् । क अनिदृशिभ्यां किच्च । ४६१ क किदिति नास्ति । ४६२ क नास्ति । ४६३ उ. नक्च । ४६४ अ मृडेः कीकन्किकनो । क मृडेः कीकन्ककनो । ४६७ अ क–कित् । ४६८ अ अर्जेः कित् ऋज च । उ. °जश्च । ४६९ अम्बरीषश्च । ४७० क °पॄगकटि° ४७१ उ. वशःकित् । ४७६ अ क विसा विहा । ४७७ अ क इतः परमधिकम् । भिदेः किच्च । ४७८ अ –धुग्लग्वालन्वलञः । क– शङिस्धुवालन्वलञः । ४८० क वल्हेरूकः । ४८३ अ नयतेर्मिः । ४८४ अ अर्तेरू च । ४८८ क वीज्यात्वरि° । ४९१ अ क °चुग्ला° । ४९३ अ क पॄदॄभ्यां विन् । ४९६ अ °छविदविस्थवि° किकिदीविः । क °स्थविदिविकिकिदीवि ।

४९९ अमेरतिः ।
५०० वहिवस्यर्तिभ्यश्चित् । ४·६०
५०१ अञ्चेः को वा ।
५०२ हन्तेरंह च ।
५०३ रमेर्नित् ।
५०४ सूङः क्रिः ।
५०५ अदिशदिभूशुभिभ्यः क्रिन् ।
५०६ वङ्क्र्यादयश्च ।
५०७ राशादिभ्यां त्रिप् ।
५०८ अदेस्त्रिन् ।
५०९ पतेरत्रिन् ।
५१० मृकणिभ्यामीचिः । ४·७०
५११ श्वयतेश्चित् ।
५१२ वेञो डिच्च ।
५१३ ऋहनिभ्यामूषन् ।
५१४ पुरः कुषन् ।
५१५ पॄनहिकलिभ्य उपच् ।
५१६ पीयेरूषन् ।
५१७ मस्जेर्नुम्च ।
५१८ गडेश्च ।
५१९ अर्तेररुः ।
५२० कुटः किच्च । ४·८०
५२१ शकादिभ्योऽटन् ।
५२२ कृकदिकडिकटिभ्योऽम्बच् ।
५२३ कदेर्णित्पक्षिणि ।
५२४ कलिकर्द्योरमः ।
५२५ कुणिपुल्योः किन्दच् ।
५२६ कुपेर्वा वश्च ।
५२७ नौ षञ्जेर्घथिन् ।
५२८ उद्यर्तेश्चित् ।
५२९ सर्तेर्णिच्च ।
५३० खर्जिपिञ्जादिभ्य ऊरोलचौ । ४·९०
५३१ कुवश्चट् दीर्घश्च ।
५३२ समीणः ।
५३३ सिवेष्टेरू च ।
५३४ शमेर्वन् ।
५३५ उल्वादयश्च ।
५३६ स्थः स्तोऽम्बजवकौ ।
५३७ शाशपिभ्यां ददनौ ।
५३८ अब्दादयश्च ।
५३९ वलिमलितनिभ्यः कयन् ।
५४० वृहोः षुग्दुकौ च । ४·१००

---

५०४ अ पूङः क्रिः । ५१२ अ वेञो डित् । ५१३ अ °मुषन् । ५१४ अ क पुस्तकयोरितः परमधिकम् । विदिपुरोश्च । ५१५ अ क पॄकलिभ्यामुपन् । नहिकलिहनिलसिभ्य उपच् । ५१८ अ क नास्ति । उ पुस्तके गंडेश्च । इतः परमधिकम् । अङ्गूपः । ५२० अ क कुटः कित् । ५२१ क °भ्योऽटच् । इतः परमधिकम् । क पुस्तके अर्तिश्रूभ्यामुटच् । अ °मटुच् । ५२२ अ क कृकलि° । ५२३ अ कदेर्णिद्वा । इतः परमधिकम् । कृत्रश्च । ५२४ अ कर्दिकलोरमः । क कर्दिकल्योरमः । ५२६ क कुवश्च । ५२९ अ क सर्तेर्णित् । ५३० अ इतःपरमधिकं सूत्रद्वयम् । शृणातेर्णित् दीर्घश्च । तमेर्दुक् च । क शृणातेर्दुक् दीर्घश्च । ५३२ अ नास्ति । ५३४ क शमेर्कन् । ५३६ अ क इतः परमधिकं सूत्रद्वयम् । हसृभ्यां कानिप् । सृजेरम्च । क सृजेरश्च ।

५४१ मिपीभ्यां रुः ।
५४२ जत्वादयश्च।
५४३ रुशातिभ्यां क्रुन् ।
५४४ जनिदाच्युसृवृमदिपामिनामिभृञ्भ्य इत्वन्त्वन्तण्क्निन्शक्स्यढडटाटचः ।
५४५ अन्येभ्योऽपि दृश्यन्ते ।
५४६ कुसेरुम्भोमेदेताः ।
५४७ सानसिवर्णसिपर्णसितण्डुलाङ्कुशचषालेल्वलपल्वलधिष्ण्यशल्याः ।
५४८ मूशक्यविभ्यः क्लः ।
५४९ माछासासिभ्यो यः ।
५५० जनेर्यक् । ४·११०
५५१ अघ्न्यादयश्च ।
५५२ स्नामदिपद्यर्तिपृशकिभ्यो वनिप् ।
५५३ शीङ्क्रुशिरुहिजिक्षिसृधृभ्यः क्वनिप् ।
५५४ धाप्योः संप्रसारणं च ।
५५५ अदेर्ध च ।
५५६ प्र ईरशदोस्तुट् च ।
५५७ सर्वधातुभ्य इन् ।
५५८ हपिषिरुहिवृतिविदिच्छिदिकीर्तिभ्यश्च ।
५५९ इगुपधात्कित् ।
५६० भ्रमेः संप्रसारणं च । ४·१२०
५६१ क्रमितमिशतिस्तम्भामत इच्च ।
५६२ मनेरुच्च ।
५६३ वर्णेर्वलिश्चाहिरण्ये ।
५६४ वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् ।
५६५ नहो भश्च ।
५६६ कृपेर्वृद्धिश्छन्दसि ।
५६७ श्रः शकुनौ ।
५६८ कृञ उदीचां कारुषु ।
५६९ जनिघसिभ्यामिण् ।
५७० अज्यतिभ्यां च । ४.१३०
५७१ पादे च ।
५७२ अशिपणाय्योरुडायलुकौ च ।
५७३ वातेर्डिच्च ।
५७४ प्रे हरतेः कूपे ।
५७५ नौ व्यो यलोपः पूर्वस्य च दीर्घः ।
५७६ समाने ख्यः स चोदात्तः ।
५७७ आङि श्रिहनिभ्यां ह्रस्वश्च ।
५७८ अच इः ।

---

५४१ अ क मापो रुरी च । ५४३ अ क रुशातिभ्यां क्रुन् । ५४४ अ °मदिशदिनमि° °स्यसटटाटचः । क °त्वन्क्नन्क्निशक्छक्सठक्टगटचः । उ °स्यठड° । ५४६ अ क कुरुलोम्भोण्डोमेदेताः किच्च । ५४७ अ °सिधर्णसि° क °सिसर्णसिवर्णसि° । ५४८ अ °व्यविभ्यः । उ मूङ्शक्य° । ५४९ अ °ससिसृभ्यो यः । ५५२ अ स्नापदिमद्यर्ति° क °द्यर्तिशकिभ्यो । ५५४ अ ध्याप्यायोः प्रसारणं च । क ध्याप्योः संप्रसारणं च । ५५५ अ क अतेर्धश्च । ५५६ अ प्रेसिदोस्तुट् च । क प्र ईरसद्योस्तुट् च । ५५७ अ इतः परमधिकम् पचिपठिकाशिवाशिनदिभ्य इन् । क पचिपठिकाशिनन्दिभ्यो इन् । ५५८ अ क ° विदिकीर्तिभ्यश्च । ५६१ अ क्रमिगमिनमितमिस्तम्भामच इच्च । क क्रमितमिनमिस्तम्भामत इच्च । ५६३ अ वले वल चाहिरण्ये । क वलेर्वाल्हि चाहिरण्ये । ५६४ अ °राजिध्राजिध्वजिसादि° । क °राजिध्रजिध्वजिसदिहनिकामिपाशिवदिवृड्भ्य इञ् । ५६८ क रुञ उदीचाम् । ५७२ अ आशिपाणिभ्यां रुहूलुकौ च । क अशिपणाय्योरुडुलुकौ । ५७३ अ क वेञो डित् । ५७४ अ प्रे भरतेः कूपे ।

५७९ खनिकष्यज्यसिवसिवनिसनिध्वनि-
ग्रन्थिचलिभ्यश्च ।

५८० वृतेश्छन्दसि । ४·१४०

५८१ भुजेः किच्च ।

५८२ कृगॄशॄपॄकुटिभिदिछिदिभ्यश्च ।

५८३ कुडिकम्प्योर्नलोपश्च ।

५८४ सर्वधातुभ्यो मनिन् ।

५८५ बृंहेर्नोऽच्च ।

५८६ अशिशकिभ्यां छन्दसि ।

५८७ ह्वभृधृसृस्तृशृभ्य इमनिच् ।

५८८ जनिमृङ्भ्यामिमनिन् ।

५८९ वेञः सर्वत्र ।

५९० नामन्सीमन्व्योमन्रोमन्लोमन्पाप्म-
न्ध्मामन् । ४·१५०

५९१ मिथुने मनिः ।

५९२ सातिभ्यां मनिन्मनिणौ ।

५९३ हनिमशिभ्यां सिकन् ।

५९४ कोररन् ।

५९५ गिर उडच् ।

५९६ इन्देः कमिर्नलोपश्च ।

५९७ कायतेर्डिमिः ।

५९८ सर्वधातुभ्यः ष्ट्रन् ।

५९९ भ्रस्जिगमिनमिहनिविश्यशां वृद्धिश्च ।

६०० दिवेर्ऋु च । ४·१६०

६०१ उषिखनिभ्यां कित् ।

६०२ सिविमुच्योष्टेरू च ।

६०३ अमिचिमिदिशसिभ्यः क्त्रः ।

६०४ पुवो ह्रस्वश्च ।

६०५ स्त्यायतेर्ड्रट् ।

६०६ गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः ।

६०७ हुयामाश्रुभसिभ्यस्त्रन् ।

६०८ गमेरा च ।

६०९ दादिभ्यश्छन्दसि ।

६१० भूवादिगृभ्यो णित्रन् । ४·१७०

६११ चरेर्वृत्ते ।

६१२ अशित्रादिभ्य इत्रोत्रौ ।

६१३ अमेर्द्विषति चित् ।

६१४ आ समिण्निकषिभ्याम् ।

६१५ चितेः कणः कश्च ।

६१६ सूचेः स्मन् ।

६१७ पातेर्डुम्सुन् ।

६१८ रुचिभुजिभ्यां किष्यन् ।

६१९ वसेस्तिः ।

६२० सावसेः । ४·१८०

---

५७९ अ °ष्यं° °र्चारभ्यश्च । क °ज्यासपुसिध्वनिसनिग्रन्थिचरिभ्यश्च । इतः परमाधिकम् । अ उभेः द्वि च । क उभे द्विः । ५८१ क भुजेः कित् । ५८२ अ °पॄतृकुटि° । ५८३ अ क कुण्टि° । ५८५ अ वृंहेरम् नलोपश्च । अ इतः परमाधिकम् । उपिकुपिह्वपिभ्यः । क उपिकुपिसृपिभ्यः कित् । ५८७ अ भृसृहृधृस्तॄसॄभ्य ईमनिन् । क भृसृहृधृस्तृसुभ्य ईमनिच् । ५८८ अ क जनिहृभ्यामिमनिन् । ५९० अ नामन्सामन्भोमन्हेमन्रोमन्लोमन्व्योमन्विधर्मन्ध्यामन्पाप्मन् । क °न्सामन्होमन्हेम° । ५९१ अ क–मनिन् । ष्ट्रन् । ५९३--५९७ न सन्ति । ५९८ अ क ष्ट्रनं । ६०० अ उ. दिवेर्युश्च । ६०३ अ क °दिशसिभ्यः कित् । ६०५ अ क स्त्री । ६०६ अ °स्त्रन् । ६०७ अ क पुस्तकयोः– व्युत्क्रमेण । क पुस्तके वर्सात्याधिकम् । ६०९ अ क इतःपरमाधिकम् । भूवादिगृभ्यो णित्रन् । ६११ क चरेर्वृत्ते ह्रस्वश्च या । ६१४ क आः समिण्° । ६१५ अ क नास्ति । ६१६ अ सूचेः क्स्मन् । ६१७ अ पातेर्डुसिच् । ६१८ अ क इतः परमधिकम् । वचेरुष्यन् । ६२० अ क नास्ति ।

६२१ वौ तसेः ।
६२२ पादिप्रथिभ्यां नित् ।
६२३ दृणातेर्ह्रस्वश्च ।
६२४ कृतॄक्षपिभ्यः कीटन् ।
६२५ रुचिवचिकुचिकुटिभ्यः कितच् ।
६२६ कुटिकुषिभ्यां क्मलन् ।
६२७ कुषेर्लश्च ।
६२८ सर्वधातुभ्योऽसुन् ।
६२९ रपेरत एच्च ।
६३० अशेर्देवने युट् च । ४·१९०
६३१ उब्जेर्बले बलोपश्च ।
६३२ श्वेः संप्रसारणं च ।
६३३ श्रयतेः स्वाङ्गे शिरः किच्च ।
६३४ अर्तेरुच्च ।
६३५ व्याधौ शुट् च ।
६३६ उदके नुट् च ।
६३७ इण आगसि ।
६३८ रिचेर्धने घिच्च ।
६३९ चायतेरन्ने ह्रस्वश्च ।
६४० वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुट् च ।
६४१ स्रुरिभ्यां तुट् च । ४·२०१
६४२ पातेर्बले जुट् च ।
६४३ उदके थुट् च ।
६४४ अन्ने च ।
६४५ अदेर्नुम्धौ च ।
६४६ स्कन्देश्च स्वाङ्गे ।
६४७ आपः कर्माख्यायाम् ।
६४८ रूपे जुट् च ।
३४९ उदके नुम्भौ च ।
६५० नहेर्दिवि भश्च । ४·२१०
६५१ इण आगोऽपराधे च ।
६५२ अमेर्हुक्च ।
६५३ रमेश्च ।
६५४ देशेऽह च ।
६५५ अञ्च्यञ्जियुजिभृजिभ्यः कुश्च ।
६५६ भूरञ्जिभ्यां कित् ।
६५७ वसेर्णित् ।
६५८ चन्देरादेश्च छः ।
६५९ पचिवाचिभ्यां सुट् च ।
६६० वहिहाधाञ्भ्यश्छन्दसि । ४·२२०
६६१ इण आसिः ।
६६२ मिथुनेऽसिः पूर्ववच्च सर्वम् ।
६६३ नञि हन एह च ।
६६४ विधाञो वेध च ।
६६५ नुवो धुट् च ।

---

६२२ अ क प्रथेर्नित् । ६२५ अ क °वचिकुत्सिकुशिभ्यः-- । ६२६ अ कुटि° क्मलच् । ६२९ अ क रपेरत एच्च इत्यस्य स्थाने पिवतेरीच्च । ६३० अ अशेर्भगे युट् च । क अशेर्युट् । ६३१ क अब्जेर्बलोपश्च । ६३८ अ--किच्च । क --घित् । उ. घित् किच्च । ६३९ अ चायेरन्ने- । ६४० उ. स्वरूपाङ्गयोः । ६४५ अ क अदेर्नुम्धश्च । ६४७ अ आपः कर्माख्यायां ह्रस्वश्च वा नुम् । क -नुट् च वा । उ. ह्रस्वस्तुट् च वा । ६४९ अ क उदके नुम्भश्च । ६५१ अ क चकारो नास्ति । ६५४ अ क देशेऽहश्च । ६५५ अ - भृजां । क °भ्रस्जां । ६५६ क °रञ्जिमिथितृपृभ्यः कित् । ६५७ अ वस्तेर्णित् । ६५८ अ °आदेश्छः । ६६० अ क °धाभ्य- । ६६३ नाञि हन एह च । उ. नञ्या° ।

६६६ गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च ।
६६७ चन्द्रे मो डित् ।
६६८ वयसि धाञः ।
६६९ पयसि च ।
६७० पुरसि च । ४·२३०
६७१ पुरूरवाः ।
६७२ चक्षेर्बहुलं शिच्च ।
६७३ उषः कित् ।
६७४ दमेरुनसिः ।
६७५ अङ्गतेरसिरिरुडागमश्च ।
६७६ सर्तेरप्पूर्वादसिः ।
६७७ विदिभुजिभ्यां विश्वे ।
६७८ वशेः कनसिः । ४·२३८

इत्युणादिषु चतुर्थः पादः ॥

---

६७९ अदि भुवो डुतच् ।
६८० गुधेरूमः ।
६८१ मसेरूरन् ।
६८२ स्थः किच्च ।
६८३ पातेरातिः ।
६८४ वातेर्नित् ।
६८५ अर्तेश्च ।
६८६ तृहेः क्नो हलोपश्च ।
६८७ वृन्लुटितनिताडिभ्य उलन् तण्डश्च ।
६८८ दंसेष्टटनौ न आ च । ५·१०
६८९ दंशेश्च ।
६९० उदि चेडैसिः ।
६९१ नौ दीर्घश्च ।
६९२ सौ रमेः क्तो दमे पूर्वपदस्य च दीर्घः ।
६९३ पूङो यण्णुक् ह्रस्वश्च ।
६९४ स्रंसेः शि कुट् किच्च ।
६९५ अर्तेः क्युरुच्च ।
६९६ हिंसेरीरन्नीरचौ ।
६९७ उदि दृणातेरजलौ पूर्वपदान्त्यलोपश्च ।
६९८ डित्खनेर्मुट् स चोदात्तः । ५·२०
६९९ अमेः सन् ।
७०० मुहेः खो मूर्च ।
७०१ नहेर्हलोपश्च ।
७०२ शीङो ह्रस्वश्च ।
७०३ माङ ऊखो मय् च ।

६६६ अ क °कारकयोरपि पूर्व° । उ. °कारकयोः पू° । ६६७ क– डिच । ६७४ अ क °रु° । ६७५–६७६ अ क उ. अङ्गिरा अप्सराः । क इतः परमधिकं सूत्रम् । ऊधः । ६८३ अ क पातेरातिः । ६८६ अ –क्नन् । ६८७ अ °तनितटितण्डिभ्य उलच् । क °तनितडितण्डिभ्य उलच् । क पुस्तके इतःपरमधिकानि सूत्राणि । ह्लपिमङ्गिशङ्किचटिवन्दिभ्यश्च । १ । कुमुलतुमुलमुकुलमञ्जुलादयश्च । २ । उलुरुधायश्च । ३ । कटिपटिमदिलविलिलिकस्यानिगटिलटितृभ्यो हल् च । ४ । पुलेः किच्च । ५ । रुलादिभ्यः कित् । ६ । एतानि षट् सूत्राणि व्याख्यासु न दृष्टानि इति सर्वस्वे । ६८८ उ. –आत् । ६९२ अ क पुस्तकयोः सूत्रद्वयमेतत् । –क्तः । दमे–इति । ६९४ अ क पुस्तकयोः– शिः– । ६९५ अ अर्तेः क्युडुश्च । क अर्तेः क्युनुच्च । उ. अर्तेः क्युजुच्च । ६९६ अ °रलचौ पूर्वपदान्तलोपश्च । क °रलचौ– । ६९८ अ क उ. °ट् चो° इतःपरमाधिकम् । हन्तेश्च द्वे । ६९९ अ क अमेरसन् । ७०१ अ नहेर्लोपश्च । इतः परमधिकम् । महेश्च । ७०२ अ क नित् इत्याधिकम् । इतः परमाधिकं सूत्रम् 'शाखा' इति । ७०३ उ. –मय–। क. माङ उखः ।

७०४ कलिगालिभ्यां फगस्योच्च ।

७०५ स्पृशेः श्वण्शुनौ पृ च ।

७०६ श्मनि श्रयतेर्डुन् ।

७०७ अश्र्वादयश्च ।

७०८ जनेष्टन् लोपश्च । ५·३०

७०९ अच् तस्य जङ्घच् ।

७१० हन्तेः शरीरावयवे द्वे च ।

७११ क्लिशेरन् लो लोपश्च ।

७१२ फलेरितजादेश्च पः ।

७१३ कृञादिभ्यः संज्ञायां वुन् ।

७१४ चीकयतेराद्यन्तविपर्ययश्च ।

७१५ पचिमच्योरिच्चोपधायाः ।

७१६ जनेररष्ठ च ।

७१७ वचिमनिभ्यां चिच्च ।

७१८ ऊर्जि दृणातेरलचौ पूर्वपदान्त्यलोपश्च । ५·४०

७१९ कृदरादयश्च ।

७२० हन्तेर्युग्नाद्यन्तयोर्घत्वतत्वे ।

७२१ क्रमिगमिक्षमिभ्यस्तुन्वृद्धिश्च ।

७२२ हर्यतेः कन्यन्हिर् च ।

७२३ कृञः पासः ।

७२४ जनेस्तु रश्च ।

७२५ ऊर्णोतेर्डः ।

७२६ दधातेर्यत् नुट् च ।

७२७ जीर्यतेः क्रिन् रश्च वः ।

७२८ मव्यतेर्यलोपो मश्चापतुट् चालः ।

७२९ ऋजेः कीकन् ।

७३० तनोतेर्डउः सन्वच्च ।

७३१ अर्भकपृथुकपाका वयसि ।

७३२ अवद्यावमाधमार्वरेफाः कुत्सिते ।

७३३ लीरीङोर्ह्रस्वः पुट् च तरौ श्लेषणकुत्सितयोः ।

७३४ क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम् च ।

७३५ अश्नोतेराशुकर्मणि वरट् च ।

७३६ चतेरुरन् ।

७३७ प्रा(प्रे ऽ)ततेररन् ।

७३८ अमेस्तुट् च । ५·६०

७३९ दहेर्गो लोपो दश्च नः ।

७४० सिचेः संज्ञायां हनुमौ कश्च ।

---

७०८ अ क जनेश्टन् नलोपश्च । ७०९ अ तस्य जङ्घ च । क – जङ्घ च । अ क इतः परमधिके सूत्रे । लूञो मनिन् । अ क्लिशेरन्ललोपश्च । क क्लिशेरन् लोलोपश्च । ७१५ उ. °रिच्च । ७१६ अ °ठश्च । ७१७अ क पचिवदिभ्यामिच्च । इतः परमधिकम् । वाचिमनिभ्यां चिद्वा। ७२० अ क °युजाद्य°। ७२१ इतः परमधिकानि सूत्राणि । अ क गुहः कन् । करोतेर्द्वे च । विपेर्व्याप्तिकर्मणि । ७२२ अ -हिरश्च । क –हिर् च । ७२३ क कृञः कृत्र । अ इतः परमधिकम् । कठिचकिभ्यामोरः । ७२४ अ क जनेस्तोरश्च । अ डनट् च । क डोऽट् च । ७२७ अ जीर्यतेः क्रिद्रश्च पुग्वा । ७२८ अ–मश्चापोऽप्तुट्– । क नास्ति । ७३० तितउशब्दः स्त्रीनपुंसकयोर्वर्तते । चालनी तितउः पुमान् इत्यमरे प्रमादः । इति उज्ज्वलदत्तः । ७३२ अ अवद्यावमार्याः कुत्सिते । ७३३ अ क उ. लीङ्° ह्रस्वश्च पुट्(क) तरो श्लेष्म° । ७३४ अ क क्लिशेरी– । इतः परमधिकं सूत्रम् । आप्नोतेः क्विब्ह्रस्वश्च । ७३७–७३८ अ क न स्तः । ७३९ अ एतत् ‘नगो प्राणिष्वन्यतरस्याम्’ (पा. सू. ६-३-७६) इति नगशब्दस्य सिद्धत्वादनर्थकमित्याहुः । ७४० अ क– कन्नुहौ च ।

७४१ व्याङि प्रातेश्च जातौ ।

७४२ हन्तेरच् घुर च ।

७४३ क्षमेरुपधालोपश्च ।

७४४ तरतेर्ड्रिः ।

७४५ ग्रहेरनिः ।

७४६ प्रथेरमच् ।

७४७ चरेश्च ।

७४८ मङ्गेरलच् । ५·७०

इत्युणादिषु पञ्चमः पादः* ॥

* उणादिसूत्रस्था गणास्तत्रत्याः साधिताः शब्दा उज्ज्वलदत्तभट्टोजीश्वेतवनवासिनारायणभट्टप्रभृतीनां टीकाभ्यः समुद्धृत्याधस्तान्निर्दिश्यन्ते । एतादृश अन्येऽपि शब्दा अत्र समावेशिता भवन्तीति लक्ष्यते ।

१ अघ्न्यादयः ५५१.

१ अघ्न्या, २ अघ्न्य, ३ कन्या, ४ वन्ध्या, ५ सन्ध्या, ६ कौतेर्डुक् च (ग. सू. १), ७ कुड्य, ८ मनो ध च (ग. सू. २), ९ मध्य, १० वद्य । इति अघ्न्यादिः ।

२ अब्दादयः ५३८.

१ अब्द, २ कौतेर्नुम् च (ग. सू. ३), ३ कुन्दः, ४ वृन्दः, ५ कन्दः, ६ तुन्दः । इति अब्दादिः ।

३ अलीकादयः ४६५.

१ अलीक, २ वलीक, ३ वल्मीक, ४ वहतेर्वृद्धिश्च (ग. सू. ४), ५ वाहीकः, ६ सुप्रतीकः । (एवमन्येऽपि) । इति अलीकादिः ।

४ अश्यादयः ६१२.

१ अशित्र, २ वहित्र, ३ धरित्री, ४ करित्र, ५ वधित्र । इति अश्यादिः ।

५ अश्वादयः ७०७.

१ अश्रु (एवमन्येऽपि यथाप्रयोगमूहनीयाः) । इति अश्वादिः ।

६ उलूकादयः ४८१.

१ उलूकः, २ वावदूकः, ३ भल्लूकः, ४ शमेर्बुक् च (ग. सू. ५), ५ शम्बूकः । इति उलकादिः ।

७ उल्वादयः ५३५.

१ उल्व, २ शुल्व, ३ निम्ब, ४ बिम्ब, ५ धन्व, ६ जम्व । इति उल्वादिः ।

८ किशोरादयः ६५.

१ किशोर, २ सहोर, ३ गौर । इति किशोरादिः ।

९ कृत्रादयः ७१३.

१ करक, २ कटक, ३ नरक, ४ सरक, ५ अलक, ६ कोरक । इति कृत्रादिः ।

१० कृदरादयः ७१९.

१ कृदर, २ मृदर, ३ सूदर । इति कृदरादिः ।

११ क्षदादयः २५०.

१ क्षत्तृ, २ क्षोतृ, ३ उन्नेतृ । इति क्षदादिः ।

१२ गुपादयः ५६.

१ गुपिल, २ तिजिल, ३ पूजिल, ४ शुपिल, ५ देविल ६ कुटिल । इति गुपादिः ।

७४१ अ क इतः परमधिकं सूत्रम् । छापूञ् खडिभ्यो कक् । ७४२ अ हन्तेर्घुरच् । क हन्तेः घुर् । ७४३–७४४ अ क न स्तः । ७४५ अ क °रणिः । तनोतेः डउः सन्वच्च ।

१३ जन्त्वादयः ५४२.

१ जन्तु, २ शिग्रु, ३ वितस्तु, ४ कद्रु, ५ अस्रु, ६ अश्रु । इति जन्त्वादिः ।

१४ तरत्यादयः ११७.

१ तरङ्ग, २ लवङ्ग । आकृतिगणोऽयम् । इति तरत्यादिः ।

१५ तुषारादयः ४१९.

१ तुषार, २ कासार, ३ सहार, ४ तर्कार । इति तुषारादिः ।

१६ त्रादयः ६१२.

१ तोत्र, २ लोत्र, ३ वहत्र । इति त्रादिः ।

१७ पिञ्जादयः ५२०.

१ पिञ्जूल, २ कञ्चूल, ३ लङ्गेर्वृद्धिश्च (ग. सू. ६), ४ लाङ्गुल, ५ तमेर्दुक्दीर्घत्वे (ग. सू. ७), ६ ताम्बूल, ७ शृणातेर्दुक् ह्रस्वश्च (ग. सू. ८), ८ शार्दूल, ९ दुक्लोः कुक्च (ग. सू. ९), १० दुकूल, ११ कुसूल, कुकूल । इति पिञ्जादिः ।

१८ पिनाकादयः ४५५.

१ पिनाक, २ तडाक, ३ भदाक, ४ श्यामाक, ५ नभाक, ६ पिण्याक, ७ वार्ताक, ८ गुवाक । इति पिनाकादिः ।

१९ फर्फरीकादयः ४६०.

१ फर्फरीक, २ दर्दरीक, ३ कर्करीक, ४ झर्झरीक, ५ तिमेर्मकारस्य उकारोऽभ्यासस्य नुट् च (ग. सू. १०) । ६ तिन्तिडीक, ७ चरेर्नुम् च (ग. सू. ११), ८ चञ्चरीक, ९ मर्मरीक, १० कर्करीका, ११ पुण्डरीक । इति फर्फरीकादिः ।

२० वलाकादयः ४२४.

१ वलाका, २ मनाका, ३ पवाका, ४ शलाका, ५ पटाक, ६ पताका । इति वलाकादिः ।

२१ मद्गुरादयः ४१.

१ मद्गुर, २ कर्बुर, ३ वन्धुर, ४ चिनोतेः कुक् च (ग. सू. १२), ५ चिकुर, ६ कोकतेर्कुक् च (ग. सू. १३), ७ कुकुर, ८ कुक्कुर, ९ आतुर, १० वागुरा, ११ प्रत्ययरेफस्य लत्वं वक्रेर्नलोपश्च (ग. सू. १४), १२ शकुल, १३ वकुल । इति मद्गुरादिः ।

२२ मिथिलादयः ५७.

१ मिथिल, २ गतिला, ३ तकिला, ४ चण्डिला, ५ पाथिल, ६ शिथिला । इति मिथिलादिः ।

२३ मूलेरादयः ६१.

१ मूलेर, २ गुधेर, ३ गुहेर, ४ मुहेर, ५ कुटेर, ६ गुदेर, ७ कडेर । इति मूलेरादिः ।

२४ मृगय्वादयः २७.

१ मृगयु, २ देवयु, ३ मित्रयु, ४ कुमारयु, ५ अध्वर्यु, ६ कुहु, ७ पाण्डु, ८ पीलु, ९ मञ्जु, १० कण्डु, ११ मृकण्डु, १२ गृहयु, (एव, १३ निघण्टु, १४ पलाण्डु, १५ कर्करेडु, १६ करेडु, १७ पेरु, १८ डमरु प्रभृतयोऽप्यत्रैव द्रष्टव्याः) । इति मृगय्वादिः ।

२५ वङ्क्यादयः ५०६.

१ वङ्क्रि, २ वप्रि, ३ अङ्घ्रि, ४ तन्द्रि, ५ भेरि । इति वङ्क्यादिः ।

२६ विडादयः ११८.

१ विडङ्ग, २ मृदङ्ग, ३ कुरङ्ग । इति विडादिः ।

२७ वृषादयः १०६.

१ वृषल, २ कुशल, ३ पलल, ४ देवल, ५ तरल, ६ सरल, ७ धवल, ८ कसेर्बुक् च

(ग. सू. १५), ९ कम्बल, १० मुशल, ११ मुसल, १२ कोशल, १३ लाङ्गल, १४ कदली, १५ कुड्मल, १६ कुटिकाशिकौलिभ्यः प्रत्ययस्य मुद् च (ग. सू. १६), १७ कुड्म‍ल, १८ कश्मल, १९ पिङ्गल, २० सम्बल, २१ शम्बल। इति वृषादिः।

२८ शकादयः ५२१.

१ शकट, २ वरट, ३ कङ्कट, ४ सरट, ५ देवट, ६ करट, ७ कपट, ८ कर्कट, ९ मर्कट, १० कर्पट, ११ पर्पट, १२ कक्खट, १३ चपेट, १४ चपट, १५ मयट, (एवमन्येऽपि कदटादयो बोद्धव्याः)। इति शकटादिः।

इति शाकटायनप्रणीत उणादिसूत्रपाठः समाप्तः।

शान्तनवाचार्यप्रणीतः

फिट्सूत्रपाठः

१ फिषोऽन्त उदात्तः।
२ पाटलापालङ्काम्बासागरार्थानाम्।
३ गेहार्थानामस्त्रियाम्।
४ गुदस्य च।
५ ध्यपूर्वस्य स्त्रीविषयस्य।
६ खान्तस्याश्मादेः।
७ वंहिष्ठवत्सरतिशतथान्तानाम्।
८ दक्षिणस्य साधौ।
९ स्वाङ्गाख्यायामादिर्वा।
१० छन्दसि च।
११ कृष्णस्यामृगाख्या चेत्।
१२ वा नामधेयस्य।
१३ शुक्लगौरयोरादिः।
१४ अङ्गुष्ठोदकबकवशानां छन्दस्यन्तः।
१५ पृष्ठस्य च।
१६ अर्जुनस्य तृणाख्या चेत्।
१७ आर्यस्य स्वाम्याख्या चेत्।
१८ आशाया अदिगाख्या चेत्।
१९ नक्षत्राणामाब्विषयाणाम्।
२० न कुपूर्वस्य कृत्तिकाख्या चेत्।
२१ घृतादीनां च।
२२ ज्येष्ठकनिष्ठयोर्वयसि।
२३ बिल्वतिष्ययो स्वरितो वा।

इति फिट्सूत्रेषु प्रथमः पादः॥

२४ अथादिः प्राक् शकटेः ।
२५ ह्रस्वान्तस्य स्त्रीविषयस्य ।
२६ नब्विषयस्यानिसन्तस्य ।
२७ तृणधान्यानां च द्व्यषाम् ।
२८ त्रः संख्यायाः ।
२९ स्वाङ्गशिटामदन्तानाम् ।
३० प्राणिनां कुपूर्वम् ।
३१ खय्युवर्णं कृत्रिमाख्या चेत् ।
३२ उनर्वन्नन्तानाम् ।
३३ वर्णानां तणतिनितान्तानाम् ।
३४ ह्रस्वान्तस्य ह्रस्वमनृत्ताच्छील्ये ।
३५ अक्षस्यादेवनस्य ।
३६ अर्धस्यासमद्योतने ।
३७ पीतद्र्वर्थानाम् ।
३८ ग्रामादीनां च ।
३९ लुबन्तस्योपमेयनामधेयस्य ।
४० न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम् ।
४१ राजविशेषस्य यमन्वा चेत् ।
४२ लघावन्ते द्वयोश्च बह्वषो गुरुः ।
४३ स्त्रीविषयवर्णाक्षुपूर्वाणाम् ।
४४ शकुनीनां च लघु पूर्वम् ।
४५ नर्तुप्राण्याख्यायाम् ।
४६ धान्यानां च वृद्धक्षान्तानाम् ।
४७ जनपदशब्दानामषान्तानाम् ।
४८ ह्यादीनामसंयुक्तलान्तानामन्तः पूर्वं वा ।
४९ इगन्तानां च द्व्यषाम् ।

इति फिट्सूत्रेषु द्वितीयः पादः ॥

---

५० अथ द्वितीयं प्रागीषात् ।
५१ त्र्यचां प्राङ् मकरात् ।
५२ स्वाङ्गानामकुर्वादीनाम् ।
५३ मादीनां च ।
५४ शादीनां शाकानाम् ।
५५ पान्तानां गुर्वादीनाम् ।
५६ युतान्यण्यन्तानाम् ।
५७ मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा ।
५८ छन्दसि च ।
५९ कर्दमादीनां च ।
६० सुगन्धितेजनस्य ते वा ।
६१ नपः फलान्तानाम् ।
६२ यान्तस्यान्त्यात्पूर्वम् ।
६३ थान्तस्य च नालघुनी ।
६४ शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूरवसां च ।
६५ सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानाम् ।
६६ ईषान्तस्य ह्यादेरादिर्वा ।
६७ उशीरदाशेरकपालपलालशैवालश्यामाकशारीरशरावहृदयाहिरण्यारण्यापत्यदेवराणाम् ।
६८ महिष्यषाढयोर्जायेष्टकाख्या चेत् ।

इति फिट्सूत्रेषु तृतीयः पादः ।

---

६९ शकटिशकट्योरक्षरमक्षरं पर्यायेण ।
७० गोष्ठजस्य ब्राह्मणनामधेयस्य ।
७१ पारावतस्योपोत्तमवर्जम् ।

७२ धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थानाम् ।
७३ कपिकेशहरिकेशयोश्छन्दसि ।
७४ न्यङ्स्वरौ स्वरितौ ।
७५ न्यर्बुदव्यल्कशयोरादिः ।
७६ तिल्यशिक्यमत्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः ।
७७ बिल्वभक्ष्यवीर्याणि च्छन्दसि ।
७८ त्वत्त्वसमसिमेत्यनुच्चानि ।
७९ सिमस्याथर्वणेऽन्त उदात्तः ।
८० निपाता आद्युदात्ताः ।
८१ उपसर्गाश्चाभिवर्जम् ।
८२ एवादीनामन्तः ।
८३ वाचादीनामुभावुदात्तौ ।
८४ चादयोऽनुदात्ताः ।
८५ यथेति पादान्ते ।
८६ प्रकारादिद्विरुक्तौ ।
८७ शेषं सर्वमनुदात्तम् ।

इति फिट्सूत्रेषु चतुर्थः पादः ।

॥ इति शान्तनवाचार्यप्रणीतः फिट्सूत्रपाठः ॥